गाह(थ)स्य सनाराचस्य ललितभ्रमरावलीकुमुदकानाम् ।
उत्फुल्लकसंगतकानां बिन्दुतिलकानां वीथीनाम् ॥ ८ ॥
अवलम्बचतुष्पदैककानां वृन्तकल(लक)हसिनीनां च ।
खडहडकखेट[9]कोना सोपानकसालभञ्जीनाम् ॥ ९ ॥

---

१ उफुल्लअसगअमगआण AB २ गीतिचविला० AB ३ रिवापिता AB ४ परिनन्दनानन्दक क्रीनक AB ५ सस्यामा AB. ६ रशना भेष. ७ कौपातलि० AB ८ कोट्टुभरिअछित्तक AB ९ खोटकाना AB

तलतालवृन्तकानां उद्गीतानां मनोरमोणां च ।
अन्धु(न्तु)ल्लकचन्द्रोद्योतकानां रासकानां च ॥ १० ॥
संदानितकविशेषकचक्कलि(ल)कानां च कुलकगलितानाम् ।
गोवृत्तप्रमुखानां क्रमेण तथा वर्णवृत्तानाम् ॥ ११ ॥
सर्वेषां प्रस्तारान्नष्टोद्दिष्टौ च लघुक्रियां संख्याम् ।
अध्वना समग्रां कथयामि षट् प्रत्ययांस्तथा ॥ १२ ॥

एतेषा येम्बो(थो)द्दिष्टानां वृत्ताना प्रस्तारादीनां(न्) षट्प्रत्ययान् कथयामीति सबन्धः । ढोपस्य रूपाणि ढोम्ररूपाणि तेषाम् । गौर्नाम वृत्त एकाक्षरं तनु(न्)मुपा(खा)नाम् । अध्वनेति सहार्थे तृतीया । मत्ता मात्रा कौटुस्तु(म्भ)कं ढोमं ढोसे(सा)मिति नाम्नि छन्दस्काराणां टीकाकृता च विप्रतिपत्तिरनेका दृश्यते तत्रा(त्रा)भिनिवेष्टव्यं सद्भिः । सस्कृते तावन्नैते दृश्यन्ते । सज्ञायाश्च फल संज्ञिप्रत्यायण(न) तच्च मत्तादिरूपेणापि न विरुध्यते । तेनात्राभिनिवेशो निष्प्रयोजन एव । सामुद्गकादीनाम् । सामुद्गकस्येति वक्तव्ये यत्सामुद्गकानामित्युक्त तदपि न ढोपाय । एता जातयो हि वृत्तानाम् । प्रत्येकस्याश्च सहस्रशो भेददृष्टो(ष्टे)र्बहुवचनमपि साधीयः ॥ ४-१२ ॥

गुरूणा लघूनां च भेदादनेकस्य वृत्तजातस्य निवृ(र्वृ)तिरतस्तत्स्वरूपमेव प्रथममाह—इअराइं इति ।

इअराइं जाण लहुअक्खराइं पाइंतिमेल्लसहिआण ।
संजोअपढमदीहरसबिंदुसविसग्गवण्णाण ॥ १३ ॥

इतराणि जानीहि लघ्वक्षराणि पादान्तिमकसहितेभ्यः ।
संयोगप्रथमदीर्घतरसबिन्दुसविसर्गवर्णेभ्यः ॥ १३ ॥

श्लिष्टानन्तरव्यञ्जनसमुदायः सयोगः प्रक्रमप्रभृतिः । तस्य प्रथमा गुरवः । इन्द्रलघ्वादीनां सर्वोदयो(?) यथा । दीर्घा एव दीर्घतराः । स्वार्थे तरप् । आईऊऋएऐओऔ प्रभृतयः । सबिन्दुः प्रसिद्धः क ख प्रभृतिः । सविसर्गो नः वः । एवभूतेभ्यो वर्णेभ्यो यानीतराणि तानि लघ्वक्षराणि जानीहि । ननु चाष्टमे(४ १)त्यादिना अष्टमषोडशयोर्गाथयो(थाया): गुरोर्विधान न च तदस्या गाथायां दृश्यत इत्युक्त पादान्तिकमक(न्तिमक)सहितेभ्य इति । तेन पादान्त(न्ते) सयोगादिव्यतिरिक्तेऽपि अइउऋप्रभृति गुरु एव । अन्तिम एवान्तिमेल्लो । स्वार्थे इल्लप्रत्ययः । पादान्तग्रहणमुपलक्षणम् । अव(र्ध)समस्तवृत्तान्तयोरपि दर्शनात् । केचिदत्राव्याप्त्यतिव्याप्ती उद्भावयन्ति यथा—यदुक्त सयोगस्य प्रथमगुरुत्व तन्न सर्वस्यैव सयोगपूर्वस्य, अपि तु तीव्रप्रयत्नस[यो]गस्य पूर्वस्य । अतीव्रप्रयत्नसंयोगपूर्वस्य लाघवमेव मात्रिकस्य यथा—

तक्खणण्हाणमणहरे तरुणिण तरन्हिल्लहसिहसिचयम्मि(?) ।
सहसहयरणमु(गु)णेहि अलआ णिवडंति द्रत्ति सलिलअणा ॥

इति । ण्हाशब्दस्यातीव्रप्रयत्नाद्योय र(ण)शब्दादकारः पूर्वस्तस्य लघुत्वमेव । तथा न्हिशब्दाद-

---

१ मरीरपाना च AB २ रासानकानां AB ३ पूर्वोद्दिष्टानां A ४ प्रस्तारानिदानीं A ५ जाइण AB

(दि)कारस्य ल्हशब्दपूर्वस्य । तथा न्तिशब्दादिकारस्य द्रपूर्वस्येति । तस्मादतिव्याप्तिरिति । अन्य-(न्यच्)च कैश्चिदरस्क(नच्क)हल्पूर्वस्य मातृकस्य गौरवमुक्त पृथक् पृथगित्यादौ थकारस्य । एतच्चेह नास्तीत्यव्याप्तिः । अत्रोच्यते । यदुक्त तीव्रप्रयत्नपूर्वस्य गौरवमिति तदभिमतमेव आचार्यस्य । येन रड्डालक्षणे प्रोक्तं च :—'एअहु[1] मत्तहु अतिमउ जव्विहि दुवहउ भ्रोद्रि । तो तहु णामे रडु फुडु छदइ कइअणु भ्रोदि ॥' (४·३१) इति । इह च अनेना[भि]प्रायेण नोक्तम् । तत्कदाचिदस्य लक्षणस्य सामान्यात् संस्कृते भ्रान्तिर्भविष्यति जनानाम् । तस्मान्नातिव्याप्तिः । यच्चोक्तमनच्कहल्पूर्वस्य गौरव नोक्त तदप्यसाधु । अनच्कहल्पूर्व[स्य] पादमध्ये तावदसंभवः[2] । यस्मात्तत्रावश्यतया संहिता भवति झगिति वगित्यादिवत् । तस्मान्मध्येऽनच्को न भवति । अन्ते च सत्यपि तस्मिन् [न] प्रयोजनं गौरवातिदेशस्य पादान्तिमकत्वेनैव गतत्वात् । यद्यपि हलोन्तास्थितिर्नाचस्तथाप्यचः प्राधान्यं, यस्माद्गौरवं लाघवं वाचि स्थितं न तु हलि । उक्तं च तैः 'अन्यो वर्णो हलु स निवे'ति (?) ॥ १३ ॥

एवं गुरुलघुस्वरूपमुक्तम् । इदानी प्रस्तारे यादृगनयोः स्वरूप तथा दर्शयति—**कुणसु** इति ।

कुणसु कुडिलोज्जुअग्गं गरुअं अंगुट्ठपव्वपरिमाणं ।
लहुअं च उज्जुअं तित्तिएण दइए पमाणेण ॥ १४ ॥

कुरु कुटिलर्ज्वग्र गुरुमङ्गुष्ठपर्वपरिमाणम् ।
लघुं चर्जुकं[3] तावतैव दयिते प्रमाणेन ॥ १४ ॥

ऋजु स्पष्ट अग्रं प्रान्तं यस्य तदृज्वग्रम् । कुटिलं वक्रम् । कुटिल च तदृज्वग्र कुटिलर्ज्वग्रम् । उदाहरणम् ॥ ऽ ॥ लघु स्पष्टमेव । प्रमाणसंख्यापूर्वत्वमात्रमुभयोरपि स्थितम् । एतदध्वयोग उपयुज्यते लाघवेन । इदानीं अशेषलक्ष्यव्याप्त्यर्थं चतुर्मात्राशविभागेन विविधसंज्ञाभिश्छेद प्रकरणमारभ्यते ॥ १४ ॥

तत्र प्रथमं तावदंशविभागमाह—**सव्वंत** इति ।

सव्वंतमज्झगरुओ पमुहे गरुओ अ सव्वलहुओ अ ।
चउमत्तंसो भणिओ पंचविहो छंदआरेहिं ॥ १५ ॥

सर्वान्तमध्यगुरवः प्रमुखे गुरुस्तथा सर्वलघुश्च ।
चतुर्मात्रांशो भणित. पञ्चविधश्छन्दस्कारै. ॥ १५ ॥

लघुकला मात्रा । चतस्रो मात्रा यस्यादौ(सौ) चतुर्मात्रः । अशो गण इति पर्यायः । छन्दस्कारैः पिङ्गलादिभिः पञ्चविधः पञ्चप्रकारो भणितः उक्तः । कथमित्याह । सर्वश्चान्तश्च मध्यश्च सर्वान्तमध्याः । सर्वान्तमध्याः गुरवो येपा ते तथा । अन्यच्च । प्रमुख आदौ गुरुर्यस्यासौ प्रमुखगुरुः तथा सर्व-लघुश्च । तेन प्रथमः सर्वलघु(गुरु)र्द्व्यक्षरोन्त्यश्चतुरक्षरः शेपास्त्र्यक्षरा इति । अकारअत्यन्ते (?) । तेपा चाद्यन्तयोर्मध्ये च गुरोरवस्थानात् । शेष लघुद्वय स्थितमेव । उदाहरणम् SS, IIS ISI, SII, IIII ॥ १५ ॥

---

१ अहमनुग्रह अतिमतं जम्वद्रवहओ भ्रोदि । तोत्तह णामउरत्वात्तच्छद कइट्ठा प्रोदि । AB २ अयं सभव AB
३ चार्जव तावतावप्व AB.

पञ्चमात्रस्याह—**पढम** इति ।

पढमलहू बीअलहू चउत्थगरुओ अ तइअलहुओ अ ।
तइअअबीअअगरुआ पमुहगुरू सव्वलहुओ अ ॥ १६ ॥

प्रथमलघुर्द्वितीयलघुश्चतुर्थगुरुस्तृतीयलघुः ।
तृतीयकद्वितीयकगुरुः प्रमुखगुरुः सर्वलघुकश्च[१] ॥ १६ ॥

अंशः कथित इत्यनुवर्तते। इत्यत्र सर्वत्र बहुव्रीहिः प्रथम(मः) लघुर्यस्येति कृत्वा। एवंविधेष्वष्टसु प्रभेदेषु अन्यमात्राभ्योऽनुत्पत्तेरग्रे च पञ्चमात्रस्यैव संज्ञासमयेऽनुवादात् पञ्चमात्र इत्यत्रार्थाछभ्यते। तेन एतदुक्त भवति। छन्दस्कारैः प्रथमलघ्वादिभेदैरष्टविकल्पः पञ्चमात्र[२] उक्तः कथित इति। प्रथमगुरुप्रथमलघ्वादीना अर्थाक्षिप्त परिशिष्टं लाघव गौरवं च। अन्यत्स्पष्टम्। एतत् स्पष्टं विस्तारोक्त इहोक्त शिष्याणा सुखाय। न ह्याचार्याणां शिष्यहितप्रवृत्ताना तद्विस्पष्टार्थं पुनरुक्तता[३] दोषाय। ते हि परव्युत्पत्तये प्रपन्ना(वृत्ताः) न त्वात्मबोधार्थम्। तस्माद्युक्तमेतत्॥ (ISI, SIS, IIIS, SSI, IISI; ISII; SIII, IIIII) ॥ १६ ॥

इदानीं तेषा सञ्ज्ञार्थमाह—**गअरह** इति ।

गअरहतुरंगपाइक्कजोहनामेहि जाण चउमत्तं ।
बहुविविहपहरणाणं [च] पंचमत्तं पिहुलसोणि ॥ १७ ॥

गजरथतुरङ्गपदातियोधा(ध)नामभिर्जानीहि चतुर्मात्रम् ।
बहुविविधप्रहरणानां च पञ्चमात्र पृथुलश्रोणि ॥ १७ ॥

हे विस्तीर्णकटि चतुर्मात्रं गजादीना यानि मातङ्गवारणादीनि [नामानि] तैरुपलक्षितं[४] जानीहि पञ्चमात्रो(त्र) गण बहूनामनेकेषा विविधाना च नानासञ्ज्ञोपलक्षिताना प्रहरणाना नामभिरुपलक्षितम्। चतुर्मात्र पञ्चमात्र चेत्येकवचनेन जातिमात्र [लक्ष्यते]। प्रयाणा(प्रयोगे?) लक्ष्ये च तथा दृष्टेरग्रे च विशेषसंज्ञाभिधानात् यथासङ्ख्ये मतिर्न विधेया ॥ १७ ॥

विशेषसञ्ज्ञार्थमाह—**कण्ण(न्न)कर** इति ।

कन्नकरपओहरचलणविप्पसन्नाइं जाणसु इमाइं ।
अन्नाइं वि चउमत्तंसआण दइए जहासंखं ॥ १८ ॥
गुरुजुव कण्णं गुरुअंत करअलं पउहरं च गुरुमज्झं ।
आइगुरुणा अ चलणं विप्पं सव्वत्त लहुएहिं ॥ १९ ॥ *

कर्णकरपयोधरचरणविप्रनामानि जानीहि इमानि ।
अन्यान्यपि चतुर्मात्रांशकाना दयिते यथासंख्यात्(ख्यम्) ॥ १८ ॥
[गुरुयुग कर्णं गुर्वन्त करतल पयोधरं च गुरुमध्यम् ।
आदिगुरुणा च चरण विप्र सर्वत्र लघुकैः ॥ १९ ॥]

---

१ संपत्तेर्लघुश्च AB २ पचम AB ३ पुनरुक्तस्थाया AB ४ A *drops* उपलक्षितं to नानासंज्ञो (in next line)
* Com drops Sanskrit rendering of this stanza The translation given here is by the editor

हे दयिते प्रिये चतुर्मात्राशकानां अन्यान्यपि कर्णादीनां सबन्धेऽत्र श्रवणादिरूपादिणि(दीनि) यथासंख्यं नामानि जानीहि। तेनैतदुक्तं भवति द्विगुरुः कर्णोऽन्तगुरुः करो मध्यगुरुः पयोधरः आदिगुरुः चरणः सर्वलघुर्विप्र इति ॥ १८-१९ ॥

इदानीं परमतेन संज्ञान्तरमाह गणविशेषस्य—**एआणमि**ति।

एआणं चिअ मज्झे गुरुमज्झंसस्स जाण अण्णं पि।
आअरणिरूविअं सण्णअंगि नामं नरेंदोत्ति ॥ २० ॥
ठाणट्ठिओ पसोहइ ठाणअरहिओवि जेण विनडेइ।
मज्जाअं पि न लंघइ तेण गुरु(रू)मज्झओ राआ ॥ २१ ॥
सामण्णेहिं पउज्जइ चउमत्तो जत्थ सुअणु नामेहिं।
तत्थ नरेंदो न निउज्जइत्ति भणिअं विसहरेहिं ॥ २२ ॥

एतेषामेव मध्ये गुरुमध्योय(ध्यांश)स्य जानीह्यन्यदपि।
आदरनिरूपित सम्म(न्न)ताङ्गि नाम नरेन्द्र इति ॥ २० ॥
स्थानस्थितः प्रसाधयति स्थानाद्रहितो[पि] येन विकोट(प)यति।
मर्यादेव जातीस्तेन गुरुमध्यमो राजा ॥ २१ ॥
सामान्यैः प्रयुज्यते चतुर्मात्रः सुतनु यत्र नामभिः।
तत्र नरेन्द्रो न नियुज्यते इति भणित विषधराभ्याम् ॥ २२ ॥

इति इत्थंप्रकारो गाथातृ(त्रि)तयस्यार्थ उक्तो भणितो विपधराभ्यां कम्बलाश्वतराभ्यां हे सुतनु जानीहि। एतेषां नामैव (म्नैवं) पूर्वोक्तानां मध्ये यो गुरुमध्यांशो गणस्तस्य नरेन्द्र इति नामान्यदपि निरूपितं आदरेण अतिशयेन विपधराभ्यामेव हे सन्नताङ्गि ललितगात्रलते। कस्मात्ताभ्यामादरेण निरूपितमित्याह—**स्थानस्थित** इति। यस्मादयं मध्यगुरुः स्थाने गाथादीनां पष्ठाद्ये प्रदेशे स्थितो निविष्टः संप्रसाधयति तत्सकलमेव वृत्त भूषयति विशिष्टरचनात्वाद्येन क(का)रणेन तेन गुरुमध्यमो राजा। येन च कारणेन तस्मादेव विहितात्स्थानाद्रहितो[2] भ्रष्टस्तदेव वृत्त विकोपयति विनाशयति तथापि गुरुमध्यमो राजा। मर्यादेवेति दृष्टान्तो यथा मया(र्या)[दा] ब्राह्मणादीनां जातीना यथोचिते स्थाने स्थितास्ता भूपयति तस्माद्युता विकटयति तद्वदयमपि। अतएव राजा। राजा हि स्थाने शास्त्रोचिते स्थितो वर्णं (र्णान्) भूपयति सम्यक्पालनात्। तस्मादेव च्युतस्तान्विस्रं[3]स्तीकरोति। किंच सामान्यैर्नामभिर्यस्मिन्वृत्तविशेषे चतुर्मात्रः प्रयुज्यते विधीयते तत्र तन्मध्ये नरेन्द्रो [न] विधीयते राजत्वादेव। राजा हि सामान्यमनुं[4]ष्यमध्ये [न] गण्यते इति। किमृध (किं मुधा) मतोपन्यसनस्य तस (तस्य) फलमित्युच्यते। अनेन दर्शयति न किंचिन्मयेह स्वबुद्धिविरचित विनद्धं न (?)। किं तर्हि अनेकशास्त्राणामेकदेशत्वाद्यथास्थितवस्तुसंग्रहेणैतच्छास्त्र मया विरचितम्। सकललक्ष्यव्यापक(क)सज्ञाः सर्वाश्च सकेतेन क्रियन्ते तास्वपि पारतन्त्र्यमस्य। अन्यच्च विपधरौ उपहासायोपन्यस्तौ। अशकविशेपस्य सज्ञामात्रेण प्रयोजनं तच्च गाथापादमात्रेण सिध्यति तत्किमनेन वृथा हत (हेतु) विशेषणादि-

---

१ Com seems to read मज्जाआ विअ जाईण तेण गुरुनज्झिमो राआ. २ ध्यानाद्रहिताध्यानाद्रहितो AB ३ स्मा विसंम्स्वीकरोति AB ४ मनूष AB.

प्रयासेनेति । अतएव सत्स्वप्यन्यशास्त्रेषु तेषा वृथाविस्तरत्वादव्याप्तेश्चानेन निवद्धमिदमिति ॥२०-२२॥

यदुक्त सामान्येन प्रयोगो यत्र तत्र नरेन्द्रस्य [न] विधानमिति तस्यापवादमाह—**गाहाखंधअ** इति।

गाहाखंधअगीईउवगीईगीइआण अ नरिंदो ।
चउमत्तंसअगणणागओवि विसमे ण ठाणम्मि ॥ २३ ॥

गाथास्कन्धकगीत्युपगीतिकानां नरेन्द्रः ।
चतुर्मात्रांशकगणनागतोऽपि विषमे न स्थाने ॥ २३ ॥

अय मध्यगुरुः गाथादीनां चतुर्मात्रगणनामध्यपतितोऽपि सामान्यसंज्ञा(ज्ञ)या विषमे स्थाने न विधेयः । विषमं यस्मादर्थे गीतिकासम्यग्भागो न लभ्यते(?) प्रथमतृतीयपञ्चमादि । पूर्वमेव प्रतिषिद्धस्यास्य वचन समस्थाना(ने) विध्यर्थम् ॥ २३ ॥

उप(व)गीइ इति ।

उवगीइ(ई)रहिआण अ छट्ठे ठाणम्मि दिज्जएँ दिओवि ।
एआणं चिअ वसुहाहिवस्स दइए अलाहम्मि ॥ २४ ॥

उपगीतिरहितानां षष्ठे स्थाने दीयते द्विजोपि ।
एतेषामपि वसुधाधिपस्य दयितेऽलाभे ॥ २४ ॥

एतेषा गाथादीना षष्ठे स्थानेऽवश्य दीयते उपगीतिवर्जितानाम् । उपगीत्यां ति(हि) षष्ठे लघोर्विधानात् । तस्मिंश्च तेषा द्विजोऽपि दीयते सर्वलघुरपि दीयते सर्वलघुरपि क्रियते । तेन द्वयो-वश्र(रेव?) विधानाद् द्विप्रभेद तत्स्थानमिति ॥ २४ ॥

अस्मिन् सर्वलघौ षष्ठे सति विशेषमाह—**छट्ठट्ठिअ** इति ।

छट्ठट्ठिअविप्पवरे पढमे वण्णम्मि कुणसु निच्चंवअं[१] ।
अह पंचमेवि बीए तो से परिहरसु मुहवन्नं ॥ २५ ॥

षष्ठस्थितविप्रवरे प्रथमे वर्णे कुरु नित्यपदम् ।
अथ पञ्चमेऽपि द्वितीये ततोऽस्य परिहर मुष(ख)वर्णम् ॥ २५ ॥

एतेयौ(एतयो.) यदा षष्ठ(ष्ठे) विप्रवरो हयति (भवति) तदास्य प्रथमे वर्णे कुरु नित्य-पद अवश्यतया तत्र पदसमाप्तिर्विधेया । चत्वारो वर्णाः साकल्येन तावत्तस्मिन् संभवन्ति । तत्र प्रथमे विच्छेदो विधेयः । यथा इह 'म्मि कुणसु' इति विप्रे सप्तम्यन्तस्य पदस्य विधान दर्शितम् । अथवा द्वितीयेऽथ यदि पञ्चमस्थाने स्थितो भवति ततोऽस्य प्रवरवर्णं पूर्वपदेन सह वर्जयेत् । एतदुक्त भवति । चतुर्थगणस्यान्ते[२] पदसमाप्तिः कार्या द्विजे पञ्चमे सति । अनन्तर पञ्चमे प्रथमपादे च (?) पदमारब्धव्यम् । इह यथा 'तो से' इति चतुर्थे गणे समाप्ते 'परिहर' इति पञ्चमे पदस्यारब्धिर्दर्शिता ॥ २५ ॥

१ निच्चयनिवअ AB २ गणपदस्यान्तसमाप्ति AB

पूर्वोक्तसामान्यवाक्यस्यापवादमाह—अवि(हि)अक्खर इति ।

अहिअक्खरनिव्वाइअवाणासिअसीसआण अ नरिंदो ।
न विरुज्झइ निच्चं चिअ दइए विसमेसु ठाणेसु ॥ २६ ॥

अधिकाक्षरानिर्वापितावानवासि[का]शीर्षकानां नरेन्द्रः ।
न विरुध्यते नित्यमेव दयिते विषमेसु स्थानेषु ॥ २६ ॥

अधिकाक्षरादीना नित्यमेव नरेन्द्रो विषमेषु स्थानेषु न विरुध्यते । स्पष्टमन्यत् ॥ २६ ॥

पञ्चमात्रस्य विशेषसंज्ञामाह—जाणअ(सु) अ इति ।

जाणसु अ जहासंखं सुरगअगरुलह(भु)अइंदनामेहिं ।
तिण्णिवि विरामगरुआ छाओअरि पंचमत्तंसे ॥ २७ ॥

जानीहि यथासंख्यं सुरगजगरुडभुजगेन्द्रनामभिः ।
त्रीनपि विरामगुरूश्छातोदरि पञ्चमात्रांशान् ॥ २७ ॥

पञ्चमा[त्रा]नां(णा) यः (ये) प्रथमलघ्वादयस्त्रयो विरामगुरवो यथासंख्यं क्रमेण सुरगजादीनां संज्ञाभिरुपलक्षिता इति जानीहि । तेनादिलघुः सुरगजस्य नामभिरैरावतादिभिर्मध्यलघुर्गरुडस्य नामभिर्वैनतेयादिभिः अन्तगुरुर्भुजगेन्द्रनामभिः फणिविषधरादिभिरिति ॥ २७ ॥

कवयोर्गुरुवर्णयोः (?) संज्ञार्थमाह—गुरुअक्खरं इति ।

गुरुअक्खरं विआणसु मणिरअणाहरणचमरणामेहिं ।
धअवट्टकरलिआणं अंतेगरुअं तिमत्तं च ॥ २८ ॥

गुर्वक्षरं विजानीहि मणिरत्नाभरणचमरनामभिः ।
ध्वजपटकदलिकादिभिरन्तगुरु त्रिमात्रं च ॥ २८ ॥

मण्यादीनां नामभिर्गुर्वक्षर विजानीहि त्रिमात्र चान्तगुरुं ध्वजपटस्य कदलिकायाश्च नामभिरिति । त्रिमात्रस्य तावत् त्रयो भेदा अन्तगुर्वादिगुरुलघुत्रयस्वरूपाः । तन्मध्यादन्तगुरोः सञ्ज्ञेयम् ॥ २८ ॥

किंच तूरविसेसा इति ।

तूरविसेसा तिलहुअगणस्स; दुलहुअगणस्स रसभावा ।
लहुअस्स वि सद्दफरिसं[स] रूवगंधाइं नामाइं ॥ २९ ॥

तूर्यविशेषाः त्रिलघुगणस्य द्विलघुगणस्य रसभावौ ।
लघोः शब्दस्पर्शस्वरूपगन्धानां नामानि ॥ २९ ॥

त्रिलघुगणस्य तूर्यविशेपाणां सबन्धे पटहादीनि नामानि जानीहि । तथा द्विलघुगणस्य रसभावौ स्वरूपेणैव न तु सञ्ज्ञिभिः । लघोस्तु शब्दाद्याः सविशेषाः (?) ॥ २९ ॥

वृत्तविशेषाणां सामान्यविधाने केषु गणेषु प्राप्तेषु येनाधिकचारुता भवति तद्विधानार्थमाह—

१ नरपति AB २ अतेगुरूअ A ३ फरिसरसरूवसद्दगधाइ A; फरिसरूवसद्दगधाइं B ४ त्रिलघुसाम्यात् AB ५ रसभावात् AB. ६ सामान्यविधावने AB.

[अहिअक्खरेति] ।

णिव्वाइअअहिअक्खरगणसमदुवईण सीसआणं च ।
मज्झलहुचउत्थगुरू अ गीइआणं वि हि[2] [अ] अंसा ॥ ३० ॥

अधिकाक्षरानिर्वापितागणसमद्विपदीनां शीर्षकाणां च ।
मध्यलघुश्चतुर्थगुरुश्च गीतिकानां च हितावशौ ॥ ३० ॥

अधिकाक्षरादीना वृत्तजातीनां तथा निर्वापितानां गणसमानां च सप्तानां द्विपदीना शीर्षकानां तथा मध्यमलघुश्चतुर्थगुरुश्चेति हितावशौ लालित्योत्पादनात्। गीतिकानां च तथा हि तावेव ॥ ३० ॥

गणसमानां विधानान्तरमाह—**एक्कदुव(म)त्त** इति ।

एक्कदुमत्तब्भहिओ हीणोवि पसंसिओ विसहरेहि ।
पाओ सत्तन्ह वि गणसमाण दुवईण पसअच्छि ॥ ३१ ॥

एकद्विमात्राभ्यधिको हीनश्च कथितो विषधराभ्याम् ।
पादः सप्तानामपि गणसमानां द्विपदीनां प्रसृताक्षि ॥ ३१ ॥

तिवासरूप (?) विपधराभ्यां पादः सप्तानामपि गणसमानां एकया मात्रया हीनो न्यूनः प्रशस्तोऽङ्गीकृतः अभ्यधिकयाप्यङ्गीकृत एव । एवं द्वाभ्यामपि मात्राभ्यां हीनाधिकत्वेङ्गीकृते गुरुलघुविन्यासे पदच्छेदयतीना सर्वथाभावह(वत्)त्वं प्रयोजनम्। तत् यदि हीनाधिकत्वेप्यासां शोभा न हीयते तत्का क्षतिरिति ॥ ३१ ॥

संज्ञान्तरार्थमाह—**समर** इति ।

समरं समोत्ति अ समे विसमम्मि अ सायरोत्ति विसमोत्ति ।
पाओ गणोव्व ठाणो भण्णइए सुअणु वित्ताण ॥ ३२ ॥

समरः सम इति [च] समे विषमे[3] च सागर इति विषम इति ।
पादो गणो वा स्थानं[4] भण्यते सुतनु वृत्तानाम् ॥ ३२ ॥

समे प्रदेशे पादो वा चतुर्मात्रादिगणो वा स्थानं द्विचतुर्थादि समर इति भण्यते । किमिय सज्ञा पर्यायरूपेण आहोस्विद्विशेपेण रूपेण स्थितेत्युच्यते । नापवादरूपेण किं तर्हि सम इति भण्यते । विषमे प्रदेशे पादादीना सागरसंज्ञा विपमसज्ञा चेति द्वय विहितम् । अन्ये त्वाहुः । हे असमे प्रिये न विद्यते समास्या इति कृत्वा । समर' सम इति भण्यते । तद्वच्च विषमोक्ते विषमा अनन्यसदृशा उक्तयो यस्या इति कृत्वा । विषमे सागर इति भण्यते । युज्यत एतत् । पण्डितानां तु मनांसि नात्यावर्जयति । प्रसिद्धस्य प्रथ[म]मुपदेशो युक्त. पश्चाद्विधेयस्येति । तथा योय देवदत्त इति प्रसिद्धस्तस्याद्यप्रकृ(भृ)तिरर्ध (?) इति नामास्त्विति । इह तु सम' प्रसिद्ध' । योसौ सम इति भण्यते तस्य समर इति नामास्तु इति प्राप्ते कथ विपर्ययो रञ्जयति विदग्धचेतासि । अस्माभिस्तु द्वयमपि दर्शितम् ॥ ३२ ॥

---

१ अहिअक्खरनिव्वाइअ Com २ विअ हिअसा A ३ विषमे दश सागर इति विशेपम इति AB ४ स्युरेवो AB

चतुर्मात्रपञ्चमात्राणां महासामान्यसंज्ञार्थमाह—**मंतित्ति** ।

मंतित्ति भण्णई जहिं पुरोहिओत्ति अ निजुज्जए जम्मि ।
चउमत्तपंचमत्ताण दोण्ह[1] जोच्चेअ पडिहाइ ॥ ३३ ॥

इअ कइसिट्ठविरइए वित्तजाईसमुच्चए पढमो नियमो समत्तो ।

मन्त्रीति भण्यते यत्र पुरोहित इति नियुज्यते योऽपि ।
चतुर्मात्रपञ्चमात्रयोर्द्वयोर्य एव प्रतिभाति ॥ ३३ ॥

यत्र मन्त्रीति भण्यते यत्र च नियुज्यते[2] पुरोहित इति तत्र चतुर्मात्रपञ्चमात्रयोर्मध्याद्य एव प्रतिभाति स एव क्रियत इति शेषः । तेन त्रयोदशभेदा अस्मिन् संज्ञाद्वये प्रतिष्ठिता इति ॥ ३३ ॥

इति प्रथमो नियमः ।

---

१ दोण्हा टोच्चेअ AB २ न युज्यते AB

द्वितीयो नियमः ।

इदानीं पादकल्पनया द्विपद्यादीना सामान्यलक्षणमभिधीयते—**कीरइ** इति ।

कीरइ गणेहि पाओ पाआ चत्तारि वत्थुअं भणियं ।
चत्तारि सगीइअवत्थुआइं दुवइत्ति निद्दिट्ठा ॥ १ ॥

क्रियते गणैः पादः पादाश्चत्वारो वस्तुक भणितम् ।
चत्वारि सगीतिकवस्तुकानि द्विपदीति निर्दिष्टा ॥ १ ॥

सामान्येन तावदेवंविधा द्विपदी निर्दिष्टा कथिता । गणैश्चतुर्मात्रैः पञ्चमात्रैर्वा वक्ष्यमाणरचनया पादः क्रियते 'कुण करकण्ण' (२·१) इत्यादिकया । ते च पादाश्चत्वारो [वस्तुक] भणितमुक्तमाचार्यैः । सह गीतिकया वर्तन्ते सगीतिकानि । सगीतिकानि च तानि वस्तुकानि सगीतिकवस्तुकानि चत्वारि द्विपदीति निर्दिष्टा । एतदुक्त भवति । वस्तुकस्यान्ते प्रत्येकशो गीतिका कार्या॥ १ ॥

अस्मिन्नेवावसरे गीतिकालक्षणमुच्यते **तइअ** इति ।

तइअधणु मणिविरमअं सत्तमसरछट्ठराअविप्पअं च ।
परिसेसनिहिअजोहअं गीइअ पुव्वद्धपच्छिमद्धअं च ॥ २ ॥ गीतिका

तृतीयकधनुर्म[णि]विराम सप्तमशरषष्ठराजविप्रं च ।
परिशेषनिहितयोध गीते.[1] पूर्वार्धपश्चिमार्ध च ॥ २ ॥

पूर्वार्धं पश्चिमार्धं च पूर्वार्धपश्चिमार्धमित्येकवद्भावः । उद्गीतिकासंबद्धोऽयं विधिलक्षणे भवतीति विशेषः (?)। कीदृशमित्युच्यते तृतीय धनुर्यस्मिंस्तत्तृतीयधनुः।'बहुविविहपहरणाण'(१·१७) इत्यादिना पञ्चमात्रस्य धनुरिति सज्ञा । तत्र सामान्येन पञ्चमात्रेषु प्राप्तेषु 'णिव्वाविअअहिअक्खर'(१·३०) इत्यादिना मध्यगुरो(लघो)श्चतुर्थगुरोश्च द्वयोरेव गीतिकाया प्राप्तिः । किं च मणिर्विरामो यस्य तन्मणिविरामो(मम्) । राजा च विप्रश्च राजविप्रौ मध्यगुरुचतुर्लघू षष्ठौ यस्य तत् षष्ठराजविप्रकम् । सप्तमः शरः पञ्चमात्रो यस्य तत् सप्तमशरं सप्तमशरं च तत्षष्ठराजविप्रं सप्तमशरषष्ठराजविप्रम् । षष्ठे राजविप्रयोः पर्यायेणावस्थानम् ।अन्यच्च । परिशेषा' तृतीयपञ्चमषष्ठसप्तमेभ्यो, योधाश्चतुर्मात्राः सामान्येन मध्यगुरोर्वर्जिताः यस्य तदेवभूतगीतिकाया अर्धद्वयलक्षण भवति ॥ २ ॥

अन्यच्च यादृग्रूपं गीतिकाया लक्ष्ये दृश्यते तदपि दर्शयितुमाह—**बिअअ** इति ।

वीअँचउत्थेसु सरो पंचमपढमेसु सत्तिदंडो अ ।
भणिएसु रहेसुवि गीइआइ ठाणेसु अविरुद्धा ॥ ३ ॥

[द्वितीय]चतुर्थयो. शर पञ्चमप्रथमयोः शक्तिदण्डश्च ।
भणितेषु रथेष्वपि गीतिकाया. स्थानेष्वविरुद्धौ ॥ ३ ॥

गीतिकायाः स्थानेषु द्वितीयादिषु रथेष्वपि भणित रुच्यन्ते (?) । तत्र द्वितीये चतुर्थे

१ परिसेसनिहिअयोव AB २ गीतिर्वा पूर्वा० AB ३ विअअ Com ४ भणितेष्वपि रथे० AB

च रयस्थानेऽपि शरो न विरुध्यते । तथैव पञ्चमप्रथमयोरपि शक्तिदण्डः पञ्चमात्रः । एतदुक्तं भवति । गीतिकायास्त्रयो भेदाः । एकः द्वितीयचतुर्थशरः स्यात् । द्वितीयः [तृतीयसप्तमशरः] । तृतीयः पञ्चमप्रथमशरश्चेति । अत्र वैम(चैव) विनियमयन्ति । तृतीयादीनां पञ्चमात्रादीना सप्तमादिर्ययोक्तेव(क्त एव) सहयोगे भवति नान्यथेति । तेन यदा तृतीयः पञ्चमात्रस्तदा सप्तमे, यदा द्वितीयः तदा चतुर्थे, यदा पञ्चमे तदा प्रथम इति । एतदभिमतमव्वादीनाम् (?) । विपर्ययोऽपि तैरिष्यत एवेति ॥ ३ ॥

सामान्यलक्षणस्यैव द्विपद्या विशेषान्तरमाह—वत्थुअ इति ।

वत्थुअगीइअमज्झे वेआरी एक्कअं दुवहअं च ।
वित्थारिअअं च कईहि कीरए सुअणु इच्छाए ॥ ४ ॥

वस्तुकगीतिकामध्ये विचार्येककं द्विपथकं वा ।
विस्तारितकं च कविभिः क्रियन्ते [सुतनु इच्छया] ॥ ४ ॥

वस्तुकस्य गीतिकायाश्चान्तराले कदाचिद्विदारी कदाचिदेककं कदाचिद् द्विपथकं कदाचिच्च विस्तारितकमित्येके । एक वा द्वौ वा त्रीणि वा सर्व एवेत्यपरे । अस्माकं तु[२] मतं वस्तुकस्य गुरुलाघववशेन यथा लालित्यं भवति तथा विचार्यादीनां रचना विधेयेति ॥ ४ ॥

एतेषा लक्षणान्याह—जा वत्थुआइ इति ।

जा वत्थुआइ लहुई सा वेआरित्ति भण्णिआ छंदे ।
दो पाआ भण्णइ दुवहउत्ति तह एक्कअं एक्को ॥ ५ ॥

या वस्तुकाल्लघ्वी सा विदारी संज्ञिता छन्दसि ।
द्वौ पादौ भण्यते द्विपथकमिति तथैककमेकः ॥ ५ ॥

तस्य विदारीति छन्दःशास्त्रे संज्ञा कृता या वस्तुकाल्लघ्वी । लाघवमत्र गणकृतमिति केचित् । एतदुक्तं भवति । यदा पञ्चभिर्गणैर्वस्तुको भवति तदा त्रिभिश्चतुर्भिर्वा विदारी विधेया । अपरे पादकृतमिच्छन्ति । त्रिभिः पादैर्विचारी भवति । द्विपथैकके यथासंख्य द्वाभ्यामेकेन च वचने (पादेन ?) भवतः ॥ ५ ॥

विस्तारितकस्येत्याह—दुवईण इति ।

दुवईण जाँ[३] ण च्छंदे सारिच्छं वहइ जं च दुअईण ।
महुरं च कई(इ)अएहिं वित्थारिअअंति तं जाण ॥ ६ ॥

द्विपदीनां[४] यत्र च्छन्दसि सादृश्यं वहति[५] यच्च द्विपदीनाम् ।
मधुरं च कृतकैर्विस्तारितमिति तज्जानीहि ॥ ६ ॥

त्वं विस्तारितकमिति बुध्यस्व यच्छन्दसि सादृश्यं वहति द्विपदीना च न वहति च ।

---

१ Both A and B add तह अ before इच्छाए. २ अस्मात्कतुमतं AB. ३ जो ण छंदो A ४ द्वितीयादीना AB ५ वेद्दयति AB.

तद्वस्तुकस्य[१] सादृश्य परिबन्धाद्वहति केनचिद्भेदान्तरेण न वहति । यथा सुमनसः पादः त्रिभिश्चतुर्मात्रैर्गुरुणा च निबद्धः ध्वजाग्र च तस्मिन् विगुर्वगुरुभ्यां (द्विगुर्वन्तगुरुभ्यां ?) विहित हीन तस्मिन्यदि द्वौ दृश्यते तदा तत्सादृश्यं वहति न वहति चेति केचित् । अन्येषा मतम् । अशकेन वा संकरे यच्च[२] वस्तुकान्न्यूनं[२] भवतीति । एकेन द्वाभ्यां त्रिभिर्वा पादैस्तद्विधीयत इत्यपरे । ननु चैतस्मिन्सति विचार्यादिभिर्न भिद्यते । कक्कतपात्रकृतोऽत्र भेदः । सर्वं चैतदभिमतमाचार्याणाम् । तथा चोक्तम्—

'विस्तारो वस्तुकस्यार्धं पादे(दो) या(वा) वस्तुकल्पकः ।
रूपक वस्तुकभव स्वल्प तस्याथवा दलम् ॥'

इति । किं च कक्कतकैर्मधुरमिति । अस्मिन्विस्तारिते माधुर्यार्थं कृतककककाररचना कार्या । यदपि क वस्तु सन्ददाति लालित्यमात्रं, कथ तत्कृतकमुच्यते कश्चासौ कृतकश्चेति । यथा कामो कामते चन्द्रश्चन्द[ते] इति ॥ ६ ॥

विशेषान्तरमाह—**जा अवलंबए** इति ।

जा अवलंबइ चउवत्थुआण अत्थं पुणो पुणो भणिआ ।
वेआरिच्चिअ सा विसहरेहि धुवइत्ति निद्दिट्ठा ॥ ७ ॥

या अवलम्बते चतुर्वस्तुकानां अर्थं पुन. पुनः पुनर्भणिता ।
विचार्येवासौ विषधराभ्यां ध्रुवकेति निर्दिष्टा ॥ ७ ॥

सा विषधराभ्या नागाभ्यां ध्रुवका कथिता विचार्येव सती । ननु किं नामान्तरकरणेन । अतो विशेष उच्यते । या पुनरुक्तापि सती चतुर्णां वस्तुकानामर्थमवलम्बते[३] वस्तु चेद्वस्तुनि बध्यते तस्मिन्वस्तुनि वाक्यस्यैव क्रियापदं ध्रुवका कार्या । एव द्वितीयादीनामिति केचित् । अन्ये त्वाहुः । यमकवच्चतुरुक्तमपि न पौ[न]रुक्त्यमावहति । प्रत्येक वस्तु[क]स्यानुगामित्वात् । एतदुक्तं भवति । गणैः पादैश्चः विदार्याः सादृश्य वहति । इयास्तु विशेषो ध्रुवकायमर्थरूपाः (ध्रुवकेयमर्थरूपा ?) । इदमेक(वा)स्माकमभिमतम् ॥ ७ ॥

अस्या सत्यां यथा द्विपद्या रूपं भवति तथाह—**भुअआहिव** इति ।

भुँअआहिवसालाहणवुड्ढकइनिरूविअं इमं दइए ।[४]
णिहणणिरूविअधुवअम्मि वत्थुए गीइआ णत्थि ॥ ८ ॥

भुजगाधिपसातवाहण(न)वृद्धकविनिरूपितं दयिते ।
निधननिरूपितध्रुवके[५] वस्तुनि गीतिका नास्ति ॥ ८ ॥

यद्य(त्र) वस्तुकस्य निधने ध्रुवका निरूपिता तत्र गीतिका न विधेया इति भुजगाधिपादीनां मतम् । यस्मादेव रचना स्थिता—प्रथम वस्तुक पश्चाद्विदार्यादीनामन्यतममन्ते च गीतिकेति ।

१ वस्तुकस्यानाद्वद्वयोपरि० AB २ यद्वयस्तुकात्० AB ३ वस्तुकानामनामर्थ० AB ४ v 8 missing in B
५ निधन निरूपिता ध्रुवके AB

ध्रुवकान्ते वस्तुकान्ते गीतिका नाभिमता आचार्याणाम् । भुजगाधिपौ कम्बलाश्वतरौ । सातवाहनो राजा । वृद्धकविर्हरिवृद्ध इति केचित् । बहूनामुपादान विकल्पनिवृत्यर्थम् । विदार्यादीनि तावदवश्यं-तथा (नावश्यतया ?) क्रियन्ते किं तर्हि बन्धवशाद्वस्तुवशाच्चेति निर्णीतम ॥ ८ ॥

भुअआहिव इति ।

भुअआहिवसालाहणवुड्ढकइनिरूविआण दुवईण ।
णामाइं जाइं साहेमि तुज्झ ताइं विअ कमेण ॥ ९ ॥

भुजगाधिपसातवाहण(न)वृद्धकविनिरूपितानां द्विपदीनाम् ।
नामानि यानि साधयामि तव तान्येव क्रमेण ॥ ९ ॥

भुजगाधिपादिनिरूपितानामित्यनेनैतद्दर्शयति या विषमद्विपद्यः इदानींतनैः कथिस्तातांसा लक्षणं नेहोच्यते । साधयामि कथयामि ।

तान्याह—**सुमना** इति ।

सुमणा तारा जोण्हा मणोवई कोमुई पगीआ अ ।
रत्ता अ माणिणी अच्छरा अ तह पउमिणी विज्जू ॥ १० ॥
विणया सरस्सई सुप्पहा विहूई सुमंगला चंदा ।
विअआ महामई णंदिणी सिरी चंदकंता अ ॥ ११ ॥
हंसी पच्छा रइआ सुम्मा सामा विलासिणी लच्छी ।
मेहा अस्सक्कंता सुसंगआ मालई दूई ॥ १२ ॥
वणराई वंसत्था ससिवअणा रअणमाला अ ।
सत्तत्तीसा एआ जाणह मत्तागणसमाओ ॥ १३ ॥

सुमनास्तारा ज्योत्स्ना मनोवती कौमुदी प्रगीता च ।
रक्ता च मानिन्यप्सराश्च तथा पद्मिनी विद्युत् ॥ १० ॥
विनता सरस्वती सुप्रभा विभूतिः सुमङ्गला चन्द्रा ।
विजया प्रभावती नन्दिनी श्रीश्चन्द्रकान्ता च ॥ ११ ॥
हंसी पथ्या रचिता सौम्या श्यामा विलासिनी लक्ष्मीः ।
मेधाश्वक्रान्ता सुसंगता मालती द्रुतिका ॥ १२ ॥
वनराजिर्वंशस्था शशिवदना रत्नमाला च ।
सप्तत्रिंशच्चैता जानीहि मात्रागणसमाः ॥ १३ ॥

एतासां सर्वपादेषु प्रथमपादसदृशा मात्रा गणाश्च [इति] जानीहि ॥ १३ ॥

चिंता सिद्धी भद्दा गंधारी मालिणी तहा कंदू ।
ललिआइ समं सत्तवि इमाउ दडए गणसमाओ ॥ १४ ॥

---

१ आचार्याणा तु AB २ तासु लक्षणमिहोच्यते AB ३ Both A and B read दीहधवलच्छि at the beginning of this line. ४ चिन्ता Com.

चित्रा सिद्धिर्भद्रा गान्धारी मालिनी तथा कद्रू[1]।
ललितया सम सप्ताप्येता दयिते गणसमाः ॥ १४ ॥

चित्राद्या गणैरेवं समसंख्यैर्युक्ता न मात्राभिर्यथा तथा तदवसर एव वक्ष्यामः ॥ १४ ॥

किंच।

विउला चवला सुमुही अ सारसी भामिणी पसण्णा अ।
नंदा सेआ अ पिए अद्धसमाओ इमा अट्ठ ॥ १५ ॥

विपुला चपला सुमुखी च सारि(र)सी भामिनी प्रप(स)न्ना [च]।
नन्दा श्वेता च प्रिये अर्धसमा एता अष्टौ ॥ १५ ॥

एतासां प्रथमस्तृतीयेन सदृशः द्वितीयेन चतुर्थः पादः ॥ १५ ॥

किंच विषमेति।

विसमा तणुमज्झा कोवणा अ णट्टी अ विस्सरूआ अ।
अविसिट्ठलक्खणाओ एआओ मए ण भणिआओ ॥ १६ ॥

उद्देसलक्खणणामाई(इं) दुवईण। इअ कइसिट्ठवित्तजाईसमुच्चये बिइओ नियमो सम्मत्तो ॥ २ ॥

विषमा तनुमध्या कोपना च नटी च विश्वरूपा च।
अविशिष्टलक्षणा एता मया न भणिताः ॥ १६ ॥

एता विषमाद्या न मयोक्ताः कस्मादविशिष्टलक्षणतया निःफलत्वात्[2]। किमेतासां लक्षणेन प्रयोजनमललितरचना महाकविबहिष्कृता ह्येताः। अत एव मया न भणिताः। एतदर्थमेव आचार्येणादावेवोपयोगष्कृतो (?) यथा भुजगाधिपादिभिर्निरूपिताना वक्ष्यामीति। ननु यद्येता नोच्यन्ते तर्कि नामग्रहणेनेत्युच्यते। अव्याप्तिपरिहारार्थमिति ॥ १६ ॥

इति द्वितीयो नियमः।

---

१ गणेनेव AB २ The last line i. e एता to निःफलत्वात् repeated after ह्येता. in A and B

तृतीयो नियमः ।

इदानीं द्विपदीवस्तुकानां सोदाहरण [लक्षण] यथोपदेशमुच्यते । **कुण कर** इति ।

कुण करकण्णविवज्जिअअं
दुण्ह गआण तुरंगमअं ।
पुरओ चारु सचामरअं
सुमणापाअ मणोहरअं ॥ १ ॥ सुमणा [सुमना.] ।

कुरु करकर्णविवर्जितं द्वयोर्गजयोस्तुरंगमम् ।
पुरतश्चारु [स]चामर सुमन.पादं शोभनम् (मनोहरम् ?) ॥ १ ॥

तुरगम गजद्वयस्य पुरतोऽग्रे कुरु । चतुर्मात्रगणद्व(त्र)यमित्यर्थ॰ । तत्र तृतीयस्य तस्य[3] विशेप उच्यते । कीदृश तुरगमम् ? । करेणान्तगुरुणा कर्णेन च द्विगुरुणा विवर्जितम् । विकल्पद्वय तत्र [न] कर्तव्यमित्यर्थः । किंच चामरेण गुरुणा सहितम् । सुमनसो द्विपद्याः पादे चरणे । चार्विति क्रियाविशेषणम् । अनेनैतद्दर्शयति सत्स्वप्यनेकान्त(केषु ?) विकल्पेषु तथा विधेयं यथा चार्वी रचना भवति ॥ उदाहरणम्[4]—॥ १ ॥

सतुरंग इति ।

सतुरंगरहो णरिंदओ
विलसंतमहग्घहारओ ।
सुमणोहरअम्मि मुद्धिए
दीसइ ताराइ पाअए ॥ २ ॥ तारा ।

सतुरंगरथो नरेन्द्रो विलसन्महार्घहारः ।
सुमनोहरे मुग्धे दृश्यते तार्यायाः पादे ॥ २ ॥

ताराया[5] पादे मध्य च दृश्यते आत्मात्रगणत्व(?)दनन्तरं गुरु । सहेति तात्पर्यम् । विशेषणानि स्पष्टानि । तानि च लालित्योत्पादनाय गृहीतानि । सुमनोहराक्षररचनाविशिष्टमुदाहरण दृष्ट्वा तथैव कविभिर्विभर्तीति (कर्तव्यमिति ?) ॥ २ ॥

जीअ पेच्छसि इति ।

जीअ पेच्छसि रहंगअं
चावअं च सवडाअअं ।
तं विआण इह छंदए
जोण्हअत्ति पसअच्छिए ॥ ३ ॥ ज्योत्स्ना ।

---

१ अमर॰ पादं AB २ गजद्वय यस्य AB ३ विशेषतस्यमुच्यते AB ४ I am not giving the signs illustrating the use of short (I) and long (S) letters as they are not correctly reproduced in either ms
५ तारया. पाद. AB

यस्याः पश्यसि रथाङ्ग चापं च सपताकम् ।
तां विजानीहि इह छन्दसि ज्योत्स्निकेति प्रसृताक्षि ॥ ३ ॥

हे विस्तीर्णाक्षि[1] यस्याः पञ्चमात्रगणद्वय पश्यसि गुर्वन्तेन वि(त्रि)मात्रेण सहितं तां ज्योत्स्निकेति जाणी(नी)हि । रथाङ्गं चक्रम् । चापं धनुः ॥ ३ ॥

पुरओ जोह इति ।

पुरओ जोहअस्स
चारु सचावअस्स ।
पाअ[2] मणोवइआ(अ)ए
सोहइ नेउर(रे)णं ॥ ४ ॥ मनोवती ।

पुरतो योधस्य चारु सचापस्य ।
पादो नूपुरेण शोभते मनोवत्या. ॥ ४ ॥

चतुर्मात्रस्य पुरतोऽग्रे पञ्चमात्रस्य नूपुरेणोपलक्षित पादं मनोवत्याः कुर्वित्यर्थः ॥ ४ ॥

पेच्छप इत्यादि ।

पिच्छ पिच्छ छउओअरिए
अह सवाणससरासणओ ।
कोमुईअ पय सोहिअओ
विरमई अ पाअस्स करो ॥ ५ ॥ कौमुदी ।

पश्य पश्य छातोदरिके एष सबाणशरासन ।
कौमुद्याः कथ शोभितो विरामे पादस्य कर ॥ ५ ॥

पञ्चमात्रगणद्वयेन सहितः करश्चतुर्मात्रो गुर्वन्तो गणः यस्य तनूदरि शोभितः अतीव मनोहर इत्यर्थः ॥ ५ ॥

अह सतुरंगम इति ।

अह सतुरंगमएणं
सुंदरि संदणएणं ।
दोहि अ नेउरएहिं
सोहइ सुट्ठु पगीया ॥ ६ ॥ प्रगीता ।

एपा च(स)तुरंगमेण[3] सुन्दरि स्यन्दनेन ।
द्वाभ्यां च नूपुराभ्या शोभते सुष्ठु प्रगीता ॥ ६ ॥

चतुर्मात्रगणद्वयेन [गुरुद्वयेन] च प्रगीता शोभते । स्यन्दनो रथ । अहेत्येतदो[4] वाचको देशीपदो निपात ॥ ६ ॥

पेक्ख पक्खिणाह इति ।

१ विस्तीर्नताक्षि AB २ पाओ णेउरेण सोहइ मणोवइए Com ३ तुतरुगो AB ४ अहोन्येतदो AB

पिच्छ पक्खिणाहअं
पत्थिवं च बीअअं ।
रत्तिआइ पाअए
चारु[1] भूसणिल्लए ॥ ७ ॥ रत्ता ।

प्रेक्षस्व पक्षिनाथं पार्थिव च द्वितीयं ।
रक्तिकायाः पादे चारुभूषणवति[2] ॥ ७ ॥

पञ्चमात्रं मध्यलघु आदौ पश्चाच्चतुर्मात्रं मध्यगुरु रक्तिकायाः प(पा)दे प्रेक्षस्व । पक्षिनाथो गरुडः । इल्लप्रत्ययो मत्वर्थे ॥ ७ ॥

रत्तिआइ इति ।

रत्तिआइ पाअअम्मि
नेउरं च[3] दिण्णमंते ।
माणिणीअ रूअअं तं
दाविअं खु पाअडं ते ॥ ८ ॥ मानिनी ।

रक्तिकाया. पादे नूपुर स्थापयान्ते ।
मानिन्या रूपकं तद्दर्शितं खलु प्रकटं तव[4] ॥ ८ ॥

अन्ते गुरुणाधिकेन पादेषु रक्तिकैव मानिनीत्यर्थः । दाविअं दर्शितम् । पाअडं[5] प्रकटम् । ते तव ॥ ८ ॥

किण्णएसि इति ।

किं ण देसि दिट्ठिं णअंगिए
अह सबाणचावे णरिंदए ।
अच्छराइ फुडणेउरिल्लए
पाअअम्मि पसअच्छि लग्गए ॥ ९ ॥ अप्सराः ।

कि न ददासि दृष्टिं नताङ्गि अस्मिन्सबाणचापे नरेन्द्रे ।
अप्सरसः स्फुटनूपुरवति पादे प्रसृताक्षि लग्ने ॥ ९ ॥

अप्सरसः पादे द्वौ पञ्चमात्रावेको मध्यगुरुश्चतुर्मात्रोन्ते गुरुश्चेति वक्तव्ये भङ्ग्यन्तरेणैतदेवाह । सहवाणेन[6] चापेन वर्तते योऽसौ नरेन्द्र तस्मिन्सनूपुरेऽप्सरसः पादे लग्ने पतिते कथ दृष्टिं न ददासीति । अह[7] अस्मिन् ॥ ९ ॥

अविरुद्ध इति ।

---

१ A adds दीसइत्ति नेउर before चारु २ भूषणविति A, भूपण चेति B ३ नेउर ठवेहि अते Com. ४ तत् AB
५ वाग्रुड AB ६ Before सहवाणेन both A and B read सहवाणेनदेवाह ७ आह AB

अविरुद्धवीअपत्थिवेसुं
पसअच्छि दे(दो)सु जोहएसुं ।
दिण्णेसु देसु पोमिणीए
पाअम्मि चावचामराइं ॥ १० ॥ पद्मिनी ।

अविरुद्धद्वितीयपार्थिवयो. प्रसृताक्षि द्वयोर्योधयोः ।
दत्तयोर्देहि पद्मिन्या. पादे चाप च चरम(मरं) च ॥ १० ॥

चतुर्मात्रयोरन्ते पञ्चमात्र गुरु च देहि । क[थ]भूतयोर्योधयोः द्वितीयस्थाने[2] पार्थिवो मध्यगुरुर्न निषिद्ध. ययो' । एव पञ्चविकल्प द्वितीयमभ्यनुज्ञातम् ॥ १० ॥

दे विज्जु[आ]इ इति ।

दे विज्जुआइ पाअघडियाणं
इह इच्छा तिण्ह तुरंगआणं ।
पढमअतइअआण विअसिअच्छि
पुरओ एक्कअस्स सुवणु[3] चावं ॥ ११ ॥ विज्जुआ [विद्युत्] ।

देहि विद्युत. पादघटितानाम(मि)हेच्छया त्रयाणां तुरङ्गमाणाम् ।
प्रथमतृतीयकानां विकसिताक्षि पुरत एकैकस्य सुतनु चापम् ॥ ११ ॥

विद्युतः पादे घटिताना रचिताना त्रयाणां[4] तुरङ्गमाना मध्याद्यौ प्रथमतृतीयौ गणौ तयोरेकैकस्य अन्यतमस्य पुरतश्चा[5]पमिच्छाया देहि । अस्मिन्प्रथमस्य दर्शितम् ॥ ११ ॥

थोरोरो(रु) हाल इति ।

थोरोरु हालभुवइंदविद्धकइलक्खणेसु सिद्धिआए
विणआइ हारिवहुवण्णदिन्नसोहम्मि देसु पाअअम्मि ।
हत्थेण णिज्जियासोअमुद्धसहआरपल्लविल्लएणं
सतुरंगपत्थिवतिअस्स चारु पुरओ धणुं च रअणअं च ॥ १२ ॥ विनता ।

थोरोरु(स्थविरोरु) हालभुजगेन्द्रवृद्धकविलक्षणेषु सिद्धाया
विनताया हारिबहुवर्णदत्त[6]शोभे देहि पादे ।
हस्तेन[7] निर्जिताशोकमुग्धसहकारपल्लवेणन (?)
सतुरङ्गपार्थिवत्रिकस्य चारु पुरतो धनुश्च रत्न च ॥ १२ ॥

तुरङ्ग पार्थिव' तुरङ्गपार्थि[व] तुरङ्ग पार्थिवश्चेति । पञ्चमात्र गुरु चेति देहि वनि(विन)तायाः पादे हालादिलक्षणेषु प्रकटाया' । हालः सातवाहन. । भुजगेन्द्रौ कम्बलाश्वतरौ । थोर' परिवर्तुलः । इल्लः स्वार्थे । निर्जितान्यशोकस्य मुग्धसहकारस्य पल्लवानि येनेति हस्तविशेषणम् । मुग्धोऽभिजातः । रमणीयैर्बहुवर्णैर्दत्ता शोभा येनेति पादविशेषणम् ॥ १२ ॥

---

१ शृतयार्न्तेहि B.A २ द्वितीयस्थाने स्थाने AB ३ Mark the वश्रुति सुवण्ण AB, ४ त्रयोनां तुरगमान्य AB ५ पुरतोऽपच्छाया AB ६ त्तोदेत्त पादे AB ७ हतेन AB ८ मुक्तोद्दिजान. AB

संदण इति ।

संदणपुरओ अ दोण्णि वाणआ
 ताण पुरिल्लिआ वेअअंतिआ ।
कण्णसुहावए जीअ पाअए
 पंकअवअणिए सा सरस्सई ॥ १३ ॥ सरस्वती ।

स्यन्दनं पुरतश्च द्वौ वाणौ तयोः पुरस्ताद्वैजयन्तिका ।
कर्णसुखावहे यस्याः पादे पङ्कजवदने सा [स]रस्वती ॥ १३ ॥

चतुर्मात्रो द्वौ पञ्चमात्रौ [लघु] गुरुश्च सरस्वत्या कार्य इति वाक्यार्थ. । वैजयन्ती पताका ॥ १३ ॥

जे(जी)से जोह इति ।

जीसे जोहवं चाव अ माअंगअं
 पेच्छसि पाअए तुरअं च चउत्थअं ।
विरमणिउत्तअं जीसे अ घअग्गअं
 भण्णइ छंदए सा सुंदरि सुप्पहा ॥ १४ ॥ सुप्रभा ।

यस्या योधं चापं [च] मातङ्गं पश्यसि पादे तुरगं [च] चतुर्थम् ।
विरामे नियुक्तं यस्याश्च ध्वजाग्र भण्यते छन्दसि सा सुन्दरि सुप्रभा ॥ १४ ॥

यस्याश्चतुर्मात्रपञ्चमात्रौ पुनश्चतुर्मात्रद्वयमन्तेगुरुं त्रिमात्रं पश्यसि सा सुप्रभा नाम द्विपदी । मातङ्गो गजः । विरामेऽन्ते नियुक्तो निवद्ध ॥ १४ ॥

वारा(र)णण इति ।

वारणणरेंदसंदणवाणए
 जीसे कमेण पाअणिउत्तए ।
पेच्छसि ससिस्स सणिभवअणिए
 जाणसु णअंगि तं च विहूइअं ॥ १५ ॥ विभूति. ।

वारणनरेन्द्रस्यन्दनवाणानां(न्) यस्याः क्रमेण पादनियुक्त (क्तान्) ।
पश्यसि शशिसन्निभवदने जानीहि नताङ्गि तां च विभूतिकाम् ॥ १५ ॥

पादनियुक्तांश्चरणविरचिनान् वारणादीन्यस्या पश्यसि ता विभूतिका जानीहि ॥ १५ ॥

वारणजोह इति ।

वारणजोहरहतुरंगमएहिं
 विरमपरिट्ठविअविहूसणएहिं ।

---

१ कर्नस्खावहो यस्या पाद AB २ The line is repeated in A and B ३ विरामनयुक्ते. ४ मन्तेगुर AB

पाओ दूरं सुमणोहरिआए
होइ अ सोम्मसुहि सुमंगलिआए ॥ १६ ॥ सुमङ्गला ।

वारणयोधरथतुरगैर्मैर्विरामप्रतिष्ठापितभूषणै.[1] ।
पादो दूरं सुमनोहराया भवति च सौम्यमुखि सुमङ्गलायाः ॥ १६ ॥

चतुर्भिश्चतुर्मात्रैर्गुरुणा[2] च सुमङ्गलापादो भवति । दूरम[त्य]र्थम् ॥ १६ ॥

ठविअएसु[3] इति ।

ठविअएसु सरतोमरएसुं
दे ठवेसु पसअच्छि तुरंगं ।
चंदिआइ वण्णुज्जलअम्मि
पाअअम्मि फुडनेउरअम्मि ॥ १७ ॥ चन्द्रिका ।

स्थापितयो·[4] शरतोमरयो. स्थापय प्रसृताक्षि तुरङ्गम् ।
चन्द्रिकाया[6] वर्णोज्ज्वले पादे स्फुटनूपुरे ॥ १७ ॥

पञ्चमात्रयो[5] स्थापितयोश्चतुर्मात्र स्थापय(या)न्ते च गुरु चन्द्रिकायाः पादे वर्णैरक्षरैरुज्ज्वलैः शोभिते । दे[7] इति प्रार्थनाया निपातः ॥ १७ ॥

विअआइ इति ।

विअआइ पिए च्छउओअरिल्लिए
ठविअम्मि ठवेसु विसालणेत्तिए ।
सतुरंगजुअम्मि रहे णरिंदअं
पुरओ दिण्णुज्जलपउमराअअं ॥ १८ ॥ विजआ [विजया] ।

विजयाया. प्रिये च्छातोदरिके स्थापिते स्थापय विलास(शाल)नेत्रे ।
सतुरगयुगे[8] रथे नरेन्द्रं पुरतो दत्तोज्ज्वलपद्मरागम् ॥ १८ ॥

सह तुरगयुगेन वर्तते योऽसौ रयश्चतुर्मात्रस्तस्मिन् स्थापिते नरेन्द्र मध्यगुरु स्थापय । दत्त उज्ज्वलः पद्मरागो यस्येति नरेन्द्रविशेषणम् । छउअ तनुम् ॥ १८ ॥

सअण्णआणं[9] इति ।

सअण्णआण[10] रसिए सुइसुहावहे
मणोहरे सुललिए कुणसु पाअए ।
पहावईअ विउणे थणतुरंगए
णअंगिए विरमए वअवडॊअअं[11] ॥ १९ ॥ प्रभावती ।

---

१ ०तुरगमै भूषणै पादो AB २ चतुर्भिश्चतुर्भिस्तैर्गुरुणा च AB ३ ठविपरेस्विति AB ४ स्थापितो यदि मरतोमरयो. AB ५ पदे स्थाने पद प्रसृतयक्षि AB ६ चन्द्रिकायवकोज्ज्वले AB ७ पादे AB ८ ०युग रथेन नरेन्द्रो AB ९ न रउणानण्णेति AB १० Ms reads मगकरान्आण (A) सरालगान (B) Commentator's read ng is accep ed in the text ११ Com seems to read विरमण्धअवदाअए

सकर्णकानां रसप्रदे श्रुतिसुखावहे मनोहरे सुललिते कुरु पादे ।
प्रभावत्या [द्वि]गुणौ स्तनतुरंगौ नताङ्गिके विरामे ध्वजपताके ॥ १९ ॥

स्तनो मध्यगुरुः । तुरंग. अविशेषेण चतुर्मात्रः । तौ द्विगुणौ गु(कु)रु । अन्ते चैका ध्वजपताका ययोरिति स्तनतुरंगि(ग)विशेषणम् । चतुर्भिश्चतुर्मात्रैस्त्रिमात्रे[ण] च प्रभावत्याः पादो भवतीत्यर्थः । सकर्णाः कवयः तेषा रस ददाति यस्तस्मिन् । श्रुतिः कर्णः ॥ १९ ॥

अ(सु)विअड्ढ इति ।

सुविअड्ढकईण सुहावणिए
ललिअक्खरपंतिपसाहणिएं ।
कुण णंदिणिपाअमणोहरिए
रसणेउरआण जुअस्स जुअं ॥ २० ॥ नदिनी ।

अविदड(दग्ध)कवीनां सुखापण(णे) ललिताक्षरपङ्क्तिप्रसाधनम् ।
कुरु नन्दिनिकायाः [पादे] मनोरम रसनूपुरयोर्युगलस्य युगम् ॥ २० ॥

रसो द्विलघुगणः । नूपुरो गुरु । तयोर्युगलस्य युगं कुरु । तौ चतुः स्थापयेत्यर्थः । आपण इवापणः । तस्मिन्नापणे हट्टे कवीनां सुखप्रापक इत्यर्थः । आपणाद्धि सर्व(र्वैः) प्राप्यते सर्वं वस्तु ॥२०॥

दइए इति ।

दइए छउ[ओ]अरि पीणपओहरिए
सिरिआअ ठवेसु मियंकसमाणणिए ।
रसनेउरआण जुअस्स जुअम्मि ठिए
फरिसं च रवं च विरामविहूसणअं ॥ २१ ॥ श्रीः ।

दयिते च्छातोदरि पीनपयोधरे श्रियः स्थापय मृगाङ्कसमानने ।
रसनूपुरयोर्युगप(ल)स्य युगे स्थितिः(ते) स्पर्शं च रवं च विरामविभूषणम् ॥ २१ ॥

नन्दिन्येव(वा)धिकान्तगुरुचतुर्मात्रा श्रीरित्यर्थः । स्पर्शरवौ लघुसञ्ज्ञौ ॥ २१ ॥

चंदक्कंतिआ इति ।

चंदक्कंतिआ सुहवारणिया
करवीसंतिआ बीआउहिआ ।
तइअतुरंगिआ इह लक्खणए
पंकअवअणिए तुह द(दा)वियआ ॥ २२ ॥ चन्द्रकान्ता ।

चन्द्रकान्ता सुखवारणिका करविश्रान्तिका द्वितीयाअ(यु)धिका ।
तृतीयतुरङ्गिका इह लक्षणे पङ्कजवदने तव दर्शिता ॥ २२ ॥

---

१ रसपदेन AB २ सलिल AB ३ सुचतुरगौ AB ४ ०केतिमकरध्वज० AB ५ सुरो AB ६ अतिसिका (अतिमिका ?) ध्वजापताकादयोरिति AB ७ श्रुतिकर्ण AB ८ Com seems to read पसाहणिअं. णदिणिपाअ मणोरमअ ९ रसाक्षिलघु० AB १० नीरपयोधरीति AB

मुखे वारणो यस्याः करौ विश्रान्तौ विरामे च यस्याः । द्वितीय आयुधः पञ्चमात्रो यस्याश्च । द्वात्रिआ दर्शिता ॥ २२ ॥

वारणवाण इति ।

वारणवाणअं जोहो चावअं च
ताण पुरिल्लुअं कुणं पालंवअं च ।
जाणसु मुद्धिए भुअअणिओत्तअम्मि
सवणसुहावए हंसीपाअअम्मि ॥ २३ ॥ हसी ।

वारणवाणौ योदं(धं) चापं च तेषां पौरस्त्यं तथा प्रालम्बक च ।
जानीहि मुग्धे भुजगनियुक्ते कर्णसुखावहे हस्याः पादे ॥ २३ ॥

प्रथमतृतीयौ चतुर्मात्रौ द्वितीयचतुर्थौ पञ्चमात्रौ गुरुश्चान्ते हस्या [पादे] । प्र(प्रा)लम्बकमाभरणम् । भुजगनियुक्ते कम्बलतराश्वरचिते ॥ २२ ॥

एक्को[3] वारण इति ।

एक्को वारणओ वीओ तुरंगओ
तइओ संदणओ वाणो चउत्थओ ।
पंचमअं च पुणो जीसे धअग्गअं
सा जड पाअडिआ पच्छा पिअल्लिए ॥ २४ ॥ पथ्या ।

एको वारणो द्वितीयस्तुरङ्गः तृतीयः स्यन्दनो वाणश्चतुर्थः ।
पञ्चममपि पुनः यस्या ध्वजाग्रं सा गजे (जगति) ? द्र(प्र)कटा पथ्या प्रियतमे ॥ २४ ॥

स्पष्टार्थम् ॥ २४ ॥

जीअ तुरंग इति ।

जीअ तुरंगवाणवाणासणपाणिजुअं णरिंदओ
होइ अ पाअअम्मि चंदुज्जलओ विरमम्मि आ(हा)रओ ।
तं थोरोरु लडहवाहूलइए मअमुद्धडच्छिए
जाणसु छंदअम्मि रइअत्ति पिए महुरक्खरिल्लिए ॥ २५ ॥ रचिर्तो ।

यस्यास्तुरंगवाणवाणासनपाणियुगं नरेन्द्रः भवति च पादे चन्द्रोज्ज्वल (लो) विरामे हारः ।
तां थोरोरुलडहवाहुलतिके मृगमुग्धाक्षि जानीहि छन्दसि रतिरिति प्रिय(ये) मधुराक्षरवति ॥ २५ ॥

पाणियुगान्तः समाहारे द्वन्द्व । वाणासन धनुः । एतदुक्तं भवति—चतुर्मात्रादनन्तर पञ्चमात्रद्वय पश्चाद्वर्तन्तौ चतुर्मात्रावेव ततोऽपि मध्यगुरुः गुरुश्चान्ते यस्या सा रतिर्नामेति । लडभः सविलासः । थोरं परिवर्तुलम् । मृगस्येव मुग्धे अक्षिणी यस्याः तस्या आमन्त्रणम् । मधुराक्षर[वति] इति पादविशेषणम् ॥ २५ ॥

---

१ दह Com २ कम्ब Com ३ एक्कोपावारणेति AB ४ रतिका Com ५ वाणा वाणानिपाणि० Ab
६ लतिके AB

यस्या एव विशेषलक्षणाह(र्थं) गीतिकामाह—करअल इति

करअलजुअलस्स णिलए रइयापाअअम्मि सुइसुहावहम्मि ।
संदणओ ण विरुज्झइ पत्थिवठाणम्मि सुवंणु विप्पओ व्व ॥
रइयाभेअविसेसदंसणत्थे गीअइया ॥ २६ ॥ गीतिका ।

करतलयुग[ल]स्य निलया(ये) रतिकापादे श्रुतिसुखावहे ।
स्यन्दनो न विरुध्यते पार्थिवस्थाने सुतनु विप्रो वा ॥ २६ ॥

यस्मिन्स्थानद्वयेन्तगुरुश्चकारसञ्ज्ञो विहितः तत्र यद्यविशेषेवा(ण) चतुर्मात्रो भवति तथापि अविरोधी तथैव चास्य(मध्य)गुरोः सर्वलघुः ॥ २६ ॥

सत्तिदंड इति ।

सत्तिदंडवाणाण ठवेसु पुरिल्लअं
भावहाॅवजुअहं लायणयअग्गअं ।
सोम्मिआइ सोमाणणतुल्लम्मि(मि)यंगिए
पाअअम्मि सुमणोहरआम्मि पिअल्लिए ॥ २७ ॥ सौम्या ।

शक्तिदण्डवाणयोः स्थापय पौरस्त्य योध च तुरग च प्रिये सध्वजाग्रम् ।
सोम्यायाः सा(सौ)[म्या]ननतुलितमृगाङ्के(ङ्के) पादे सुमनोहरे प्रियतमे ॥ २७ ॥

पञ्चमात्रयोरग्रे चतुर्मात्रगु(ग)णद्वय त्रिमात्र चान्तर्गुरु स्थापय । सौम्येनाननेन तुलित' सदृशीकृतो मृगाङ्को(ङ्को) यया तस्या आमन्त्रणम् ॥ २७ ॥

पढमवाण इति ।

पढमवाणबीआसणितइअतुरंगमस्स
कयचउत्थरहपंचसफुडधयवट्टअस्स ।
सुम्मिआई(ड) पाअस्स विरामणिउत्तएणं
होइअ सुवंणु नाम सामत्ति विहूसणेणं ॥ २८ ॥ श्यामा ।

प्रथमबाणद्वितीयाशति(नि)तृतीयतुरंगमस्य कृत(त)चतुर्थरथपञ्चमस्फुटध्वजपटस्य ।
सोम्यायाः पादस्य विरामनियुक्तेन भवति सुतनु नाम श्यामेति विभूषणेन ॥ २८ ॥

एवंभूतसोम्यापादस्य विरामनियुक्तेन गुरुणा श्यामेति नाम भवति । अशनिर्वर्ज(ज्र)म् ॥ २८ ॥

पंचमछट्ठ इति ।

पंचमछट्ठट्ठिअपाअक्कअंसत्तमठविअरहांगिआए
तइअचउत्थअकअसाअंगअविरमणिरुविअरअणिआए ।

---

१ सुतनु (वश्रुति) २ श्रुतिसुवाट AB ३ वाहिवस्थाने AB ४ भावहावजोअला यहणयअग्गअं A Cons seems to read जोह च तुरगं च पिए सधअग्गअ. Perhaps read भावहारजुअल णिहणे अ धअग्गअ (= भावहारयुगल निधने च ध्वजाग्रम्). ५ सुमनोहरेति प्रिय० AB ६ चतुर्गुरु AB

पढमट्ठाणणिउत्ततुरंगमबीअपरिट्ठिअजोहियाए
कस्स सुहाइ ण वड्ढइ हरिसो सुअणु विलासिणिदुवइआए ॥ २९ ॥ विलासिनी ।

पञ्चमषष्ठस्थिते(व)पदातिसप्तमस्थापितरथाङ्गिकया
तृतीयचतुर्थकृतमातङ्गिकविरामनिरू[पि]तरत्निकया ।
प्रथमस्थाननियुक्ततुरंगमद्वितीयपरिष्ठितयोधया
कस्य भूतया न वर्धते हर्ष. सुतनु विलासिनीद्विपदिकया ॥ २९ ॥

सर्वस्यैव विलासिन्या अवधारितया हर्षो वर्त(र्ध)ते यस्या चतुर्मात्रा: षट् सप्तमा(मो)ऽन्ते पञ्चमात्रो गुरुश्च विरामे भवति । सर्वत्रैवास्मिन् सामान्योक्तोवधे(क्तौ बन्धे ?) लक्ष्यगतिरनुसर्तव्या । यस्मादाचार्या य(यत्) स्वाचारत्वात्प्राप्यते तदुदाहरणेनापि प्रकाशयन्ति । एतदर्थमेव सुललित-पदरचनां शिक्षयता नानाविधान्यामन्त्रणापदानि प्रयुक्तान्याचार्येण ॥ २९ ॥

वि(णि)अमिअ इति ।

णिअमिअअं खुरुप्पअं च पुरओ अ जोहअस्स
पट्टिसओ रहंगअं मग्गए सुरगअस्स ।
पेच्छसि ससिसमाणणे रूवं(व)[अं] सहिअणा(आ)ण
सुई(इ)सुहअम्मि मुद्धिए [पाए अ] लच्छिआए ॥ ३० ॥ लक्ष्मीः ।

नियमित क्षुरप्र पुरतश्च योधश्च(स्य) पट्टिश रथाङ्गं मार्गतः सुरगजस्य ।
पश्य शशिसमानने उत्सुक सहृदयानां श्रुतिसुभगं मुग्धे पादे च लक्ष्म्याः ॥ ३० ॥

लक्ष्म्याः पाद इदमिद पश्यत (?) उत्सुकमुत्कण्ठित कृत्वा । किं तश्(त्) चतुर्मात्रस्य पुरतोऽग्रे क्षुरप्र पञ्चमात्र नियमितम् । क्षुरप्रसञ्ज्ञा शरविशेषस्य । पश्चात्पट्टिशरथाङ्गौ पञ्चमात्र(त्रौ) । पट्टिशः आयुधविशेष. । सुरगजस्यादिलघोः मार्गत. पश्चाद्भागे । सहृदयाना श्रुतिसुभगं इति [सबन्धः] ॥ ३० ॥

जीअ दुए इति ।

जीअ दुए वारणआ दो तुरआ जोहओ अ
ताण पुरो णिअमिअउ(ओ) अंतिअओ सुरगओ अ ।
पेच्छिज्जसु चंदवअणिए सुइसुहवत्तणम्मि
लक्खणए कइअणओ भणइ अ [तं] मेहअंति ॥ ३१ ॥ मेधा ।

यस्या द्वौ वारणौ [द्वौ] तुरगौ योधश्च तेषां पुनर्नियमितोऽन्तिम सुरगजश्च ।
पश्य चन्द्रवदने श्रुतिसुखवर्तने लक्षणे कविजनो भणति च तां मेघेति ॥ ३१ ॥

हे रा(च)न्द्रवदने पश्य विलोकय । श्रुतौ सुख वर्तयति यत्तस्मिंल्लक्षणे । कविजनस्तमेव भणति [मेधामिति] । किंभूताम् । यस्य द्वौ भाणौ(वारणौ?) चतुर्मात्रौ पुनरपि द्वावेव तौ तुरगाख्या(वश्वा ?)—

---

१ शुभया ? Com has भूतया for this word. २ The words प्रथमस्थाननियुक्त from next line are repeated before तृतीयचतुर्थ० in both AB ३ याधेकयास्य AB ४ पुरओ पुरओ अ AB ५ उच्छुअ Com. ६ पुणो Com

वनन्तरं योध एवं पञ्च चतुर्मात्राः। पुनः पश्चादन्तिमः पञ्चमात्रः आदिलघुः। नियमितो निबद्धः ॥ ३१ ॥

हाररसाण इति।

हाररसाण पिए पुरओ कुण णेउरअं
गंधविहूसिअए कुण दोण्णिवि पत्थिवए।
चारुपओहरए ठविअम्मि मणोहरए
दूरसमुज्जलअम्मि णिउंज्जसु मुद्धडिए ॥ ३२ ॥

हाररसयोः प्रिये पुरतः कुरु नूपुरं गन्धविभूषितौ कुरु द्वौ पार्थिवौ।
चारुपयोधरे स्थापिते मनोहरे द(दू)रसमुज्ज्वलं विनियुङ्क्ष्व [मुग्धे] ॥ ३२ ॥

[विनियुङ्क्ष्व] विधेहि कस्याः किंचि(किमि)त्यस्यैवाह(र्थ)स्य पूरणार्थं गीतिकामाह—ह(फ)रिसं इति।

फरिसं मणिं महूए दूरूज्जलवण्णदिण्णसोहम्मि।
अस्सक्कंतापाअए बहुसहिअ[अ]लोअदिण्णहरिसम्मि ॥ ३३ ॥

लक्खणपूरणत्थे गीईआ। अस्सक्कन्ता [अश्वक्रान्ता]।

स्पर्शं रवे(मणि) च मधुरे दूरोज्ज्वलवर्णदत्तशोभे।
अश्वक्रान्तापादो(दे) बहुसहृदयलोकदत्तहर्षः(र्षे) ॥ ३३ ॥

स्पष्टेयम्। वस्तुकोदाहरणम् ॥ ३३ ॥

हाररस इति

हाररसाण जुअस्स-[जु]ए ठविअम्मि ठविज्जओ णेउरअं
ठाइ पुणोवि सरूवजुअं कडअं करपल्लवअं च पिए।
तेसु ठवेसु [स]सद्दजुअं पसअच्छि णिउंजसु चामरअं
संगअपाअमणोहरए विविहोज्जलवण्णपसाहणए ॥ ३४ ॥ संगता।

हाररसयोर्युगप(ल)स्य युगे स्थापिते स्थापय नूपुरं
दत्स्व पुनरपि सरूपयुग कटक करपल्लवमपि वि(प्रि)ये।
तेषां स्थापय सशब्दयुग प्रसृताक्षि नियुङ्क्ष्व चामरं
संगतिकाचरणे प्रिये विविधोज्ज्वलवर्णप्रसाधने ॥ ३४ ॥

सगतिकायाश्चरण इदामिद स्थापय। हारश्च रसश्च हाररसौ तयोर्युगप(ल)स्य युगे स्थापिते तयोश्चतुर्निवसु(वेशि ?)तयोरित्यर्थः। त(आ)दिगुरुचतुर्मात्रचतुष्टय इति यावत्। पश्चाद्गुरु स्थापय। देहि पुनरपि सरूपयुगं गुरुम्। अनन्तरमपि करपल्लवमन्तगुरुं स्थापय तेषु स्थापितेषु सत्सु। किंभूतं करपल्लवं सहशब्दयुगेन वर्तमानम्। अन्ते चैपा चामरं नियुङ्क्ष्व। आदिगुरुभिः सप्तभिर्गुरुणा च संगतायाः पादो भवतीति तात्पर्यम्। विविधैरुज्ज्वलैर्वर्णैः प्रसाधन यस्येति समासः ॥ ३४ ॥

१ ०ज्जल्अं विणिउजसु Com २ चानपयो०(पीनपयो ?) AB ३ सगइआचरणे पिअए Com ४ सगनकाचरणप्रिये AB

सतुरंग इति ।

सतुरंगरहस्स दो(दे)सु पुरउ(ओ) कमेण जोहअस्स
वारणअं मालइ(ई)अ पाइक्कअं च महुरअम्मि ।
विसमट्ठाणो(ण)अविरुद्धथणछट्ठकअरहंगअम्मि
पाअम्मि वरोरु विरमविलसंतपउमराअअम्मि ॥ ३५ ॥ मालती ।

सतुरगरथस्य देहि पुरतः क्रमेण योधस्य वारणं मालत्याः पदानि [च] मधुरे[1] ।
विषमस्थानाविरुद्धस्तनषष्ठकृतरथाङ्गे पादे वरोरु विरामविलसत्पद्मरागे ॥ ३५ ॥

सह[2] तुरगेण रथेन च वर्तते योऽसौ [यो]धस्तस्य पुरतो वारणं पदातिं च देहि । पञ्च चतुर्मात्रा[न्] स्थापयेदित्यर्थः । मालत्या पादे । किंभूते । विषमे स्थाने न विरुद्धं(द्धः) स्तनो यस्य । 'सामण्णेण' (१ २२) इत्यस्यापवादः । षष्ठे च रथाङ्ग चक्रं यस्य । विषमस्थानेऽविरुद्धस्तनश्चासौ पष्ठकृतरथाङ्गश्चेति समासः । तस्मिन् । तथा विरामेऽन्ते विलसन्पद्मरागो गुरुर्यस्य ॥ ३५ ॥

मुद्धडिए इति ।

मुद्धडिए बहुविअड्ढलोअसुस(सु)हाविआए
पंचमअं तइअअं च इह हारिबंधिआए ।
कुल(ण) चउसुवि पाअएसु महुरक्खररिल्लिआए
हरिरहगयजोहआण णरणाहअं दुवाए ॥ ३६ ॥ द्रुता ।

मुग्धिके बहुविदग्धलोकसुसुखावहायाः पञ्चम तृतीय वौ(चे)ह हारिबन्धिकायाः ।
गु(कु)रु चतुर्ष्वपि [पादेषु] मधुराक्षा(क्ष)रवत्याः हरिरथगजयोधानां नरनाथ द्रुतायाः ॥ ३६ ॥

द्रुतायाश्चतुर्मात्रे षट्के कृते तन्मध्ये तृतीयपञ्चमयोर्नरनाथयोर्विधानमिति तात्पर्यम् । हरिरश्वः ॥ ३६ ॥

पढमतुरंग[3] इति ।

पढमतुरंगबीअविणिउत्तबाणआणं
तइअणिरूविआसिसचउत्थपत्थिवाणं ।
वणराईअ देसु विरमम्मि पाअआणं
णेउरजुअलअं च महुरक्खररिल्लिआणं ॥ ३७ ॥ वनराजिः ।

प्रथम[4]तुरगद्वितीयविनियुक्तबाणानां तृतीयनिरूपिताशिसचतुर्थपार्थिवानाम् ।
वनराज्या देहि विरामे पादानां[5] नूपुरयुगलकं च मधुराक्षरवताम् ॥ ३७ ॥

वनराज्याः पद[विरामे] नूपुरयुगलकं गुरुद्वय देहि । किंभूतानाम् । प्रथमे तुरगो द्वितीये च विनियुक्तो बाणो येषां च तृतीये[6]ऽसिर्निरूपितः सह च चतुर्थेन पार्थिवेन वर्तन्ते ये ते तृतीय-

[1] मधुरो रुद्ध स्तनषष्ठ AB [2] स च तुरगम AB [3] पर्णमसतुरगेति AB [4] प्रथमचतुरगाद्वितीय AB
[5] वनराज्या देहि विरामे पादानां immediately repeated in AB [6] तृतीयेपिसनिरू० AB

निरूपितासिसचतुर्थपार्थिवास्तेषाम् ॥ ३७ ॥

पढम इति ।

पढमगइंदवीअविणिउत्तसरासणाण तइआसणी(णि)ए
कुणसु चउत्थमुद्धकरपल्लवए फुडपंचमसंदणए ।
वंस²थो(त्था)इ विरमरसणेउरए कअछट्ठतुरंगमए ।
पाए पुण्णअंद्ध(द)सोम्माणणिए बहुवण्णपसाहणए ॥ ३८ ॥ वंशस्था ।

प्रथमगजेन्द्रद्वितीयविनियुक्तशरासने तृतीयाशनिके
कुरु चतुर्थमुग्धकरपल्लवे स्फुटपञ्चमस्यन्दने ।
वंशस्थायाः विराम(मे) रसनूपुरौ कृतषष्ठतुरंगमे
पादे पूर्णचन्द्रसा(सौ)म्याननने बहुवर्णप्रसाधने ॥ ३८ ॥

वंशस्थायाः पादे विरामे अन्त(न्ते) [रस]नूपुरौ कुरु । कर इत्यर्थः । किंभूते । प्रथमे गजेन्द्रो यस्य द्वितीये च यस्य विनियुक्त शरासन स प्रथमगजेन्द्रद्वितीयविनियुक्तशरासनः । तृतीये तथा वज्र यस्य चतुर्थं करपल्लवो अन्तगुरुर्यस्य । तथा पञ्चमे स्यन्दनो यस्य तथा षष्ठे च कृतस्तुरंगमो यस्य तस्मिन् ॥ ३८ ॥

[**पढम** इति] ।

पढमगअंदवीअविणिउत्तसरासणए
तइअणिरूविआसिसचउत्थतुरंगमए ।
पाए देसु रअणमालाइ मणोहरअं
पंचमअं वरोरु विरमे करपल्लवअं ॥ ३९ ॥ रत्नमाला ।
सत्ततीसं दुवईओ मत्तागणसमाओ सम्मत्ताओ ।

प्रथमगजेन्द्रद्वितीयेविनियुक्तशरासने तृतीयनिरूपितासिसचतुर्थतुरंगमे ।
पादे देहि रत्नमालायाः मनोहरं पञ्चम वरोरु विरामे करपल्लवम् ॥ ३९ ॥

चतुर्मात्रपञ्चमात्रद्वयचतुर्मात्रा करपल्लवमन्तगुरुमिति रत्नमालायाः पादे देहीति तात्पर्यम् ॥ ३९ ॥

एवमेताः सप्तत्रिंशद् द्विपद्यो मात्राभिर्गणै. समपादचतुष्टयत्वान्मात्रागणसमाः । इदानीं सप्त गणसमा उच्यन्ते । यासा गणैरेव साम्यं न मात्राभि ॥

भूसणअं इति ।

भूसणअं रसो यं पसुहे पुणो अ तुरअओ अ
त[इ]ओ पत्थिओम्व(व्व) णिअमेण होइ विप्पओ व्व ।

---

१ सरामणए Com २ Com seems to read वमत्थइ विरमइ रसणेउरआ ३ नृतीयासरिके AB ४ तुरंगमसए AB
५ मत्तामत्तागण० AB ६ व्व Com

मंतिअओ पुणोवि अविरुद्धथणतुरंगओ अ
बाणो णेउरं च चिंताइ सुअणु पाअम्मि ॥ ४० ॥ चित्रा ।

भूषण रसो वा प्रमुख(खे) पुनरपि तुरगश्च तृतीयः पार्थिवो वा नियमेन भवति विप्रो वा ।
मन्त्री [पुन]रप्यविरुद्धस्तनतुरंगश्च बाणो नूपुरश्चित्राया भवति [सुतनु] पादे ॥ ४० ॥

चित्रायाः पाद(दे) प्रथमं गुरुर्भवति रसो वा । रसो लघुत्व(द्व)यमिति एकं स्थानम् । द्वितीयतु(स्तु)रगः सामान्येन चतुर्मात्रः । तृतीयः पार्थिवो मध्यगुरुर्वा विप्रः सर्वलघुर्वा नियमेन भवति । पश्चान्मन्त्री सामान्येन चतुर्मात्र. पञ्चमात्रो वा । अत एव मात्राभिर्विषमत्वाद्वर्णैरेव साम्यमासाम् । यस्मान्मन्त्रिगणे सति । कस्यचित्पादस्य[3] मात्राश्चतस्रो घटन्ते कस्यचिच्च पञ्च इति[3] । अनन्तर मन्त्रिणः पश्चादविरुद्धस्तनो मध्यगुरुसहितस्तुरंगमो भवति । पश्चादपि बाणनूपुरौ पञ्चमात्रगणगुरू चेति चित्रायाः पञ्चमात्रा च (?) सामान्येन भेदलक्षणम् ॥ ४० ॥

तिण्णि इति ।

तिण्णि पुरोधअआ धअग्गअं
पाएसु चउसुंपि विहत्तअं ।
वयणेण तुलिअससिबिंबए
सिद्धीअ सआ पसअच्छिए ॥ ४१ ॥ सिद्धी ।

त्रयः पुरोहिता ध्वजाग्रं पादेषु चतुर्ष्वपि विभक्तम् ।
वदनेन तुलितशशिबिम्बे सिद्धे' सदा [प्रसृताक्षि] ॥ ४१ ॥

[सिद्धेः] पादेषु त्रयश्चतुर्मात्रा' पञ्चमात्रा वा सामान्येन भवन्ति । तेन प्रत्येकमेतद् द्वादशविकल्पं मध्यगुरुं विनेति । अनन्तरं ध्वजाग्रमन्ते त्रिमात्रमन्तगुरुमिति यस्या' पादेषु विभक्ते(क्तं) विभागेन स्थापित रचितम् ॥ ४१ ॥

जीसे होइ इति ।

जीसे होइ पुरोहिओ वारणओ अ सबाणओ
पाइक्को अ सजोहओ विरमम्मि सत्तिदंडओ ।
[सा] राअहंसगमणिए पंचमबीइअट्ठा(ठा)णए
अविरुद्धभूमिणाहए भद्दित्ति णाम दुवइया ॥ ४२ ॥ भद्रा ।

यस्या भवति पुरोहितो वारणश्च सबाण. पदातिश्च सयोधो[4] विरामे शक्तिदण्ड ।
तां(सा) राजहसगमने पञ्चमद्वितीयस्थाने अविरुद्धभूमिनाथे भद्रेति नाम द्विपदिका ॥ ४२ ॥

सा भद्रा नाम द्विपदिका यस्या आदौ पुरोहित गण सामान्येन भवति । अनन्तर सबाणो वारणः[5] । पश्चात्पदाति[6]' योधेन सह विरामेन्ते च शक्तिदण्ड । पञ्चमे तथा द्वितीये स्थाने भूमिनाथे

---

१ चित्रा Com २ मध्यगुरोर्वा विषय सल्घुर्वा AB ३ पादश्चतुर्थमात्रश्चतस्रो घटाते कस्यचिच्च पचम इति AB
४ सयोगो AB ५ रावण AB ६ पदायोवेग सह AB

सति अविरुद्धे भवतीयम् ॥ ४२ ॥

पमुहे इति ।

स(प)मुहम्मि पुरोहिआण जुअलअं
पत्थिवओ विप्पउव्व तइओ ।
जीसेवि [होइ] चउत्थबाणओ
सा गन्धारित्ति णाम दुवइआ ॥ ४३ ॥ गन्धारी ।

प्रमुखे पुरोहितयोर्युगलकं पार्थिवो विप्रो वा तृतीयकः ।
यस्याश्चतुर्थो बाणः सा गान्धारीति नाम द्विपदिका ॥ ४३ ॥

यस्याः प्रमुखे पुरोहितयोर्युगलकं द्वितीय[1] भवति तृतीयः पार्थिवो विप्रो वा बाणश्चतुर्थ इति ॥४३॥

जीसे पा[अ]ए इति ।

जीसे पाअए पंकयवअणिए दूरअं सवणसुहावअम्मि
ससलिलबद्धए सण्णअबाहिए मुद्धिए अन्तिमरअणम्मि ।
पढमबीअओ अ तइअचउत्थओ पंचमछट्ठअसत्तमो अ
होइ पुरोहिअत्ति विंबोठिए छट्ठ(छंद)अम्मि जाणसु मालिणित्ति ॥ ४४ ॥ मालिनी ।

यस्याः पादे पङ्कजवदने दूरं श्रुतिसुखावहे
सललितबन्धे संनि(न)तबाहो मुग्धे अन्तिमरत्ने ।
प्रथमद्वितीयस्तृतीयचतुर्थ(र्थः) पञ्चमषष्ठकं(क)सप्तमश्च
भवति पुरोहितस्तां बिम्बोष्ठिके छन्दसि जानीहि मालिनीति ॥ ४४ ॥

ता मालिनीति जानीहि । यस्याः सप्तसु स्थानेषु पुरोहितो भवति पादे । किंभूते । अन्तिमं रत्नं यस्य । सन्नतौ परिवर्तुलौ बाहू यस्यास्तथा बिम्बस्य लोहितफलविशेषस्य सदृशे ओष्ठौ यस्यास्तस्या आमन्त्रणम् । ह(दू)रमत्यर्थम् ॥ ४४ ॥

कद्दूअ इति ।

कद्दूअ होइ पाअए
वीआविरुद्धथणअए ।
मंतिम(अ)ओ सदु(तु)रंगओ
विरमे अ सत्तिदंडओ ॥ ४५ ॥ कद्रू ।

कद्रूवा भवति पादे द्वितीयाविरुद्धस्तने ।
मन्त्री सतुरंगमो विरामे [च] शक्तिदण्ड. ॥ ४५ ॥

कद्रूवाः पादे सामान्येन [मन्त्री] प्रथमगणो भवति पश्चाच्चतुर्मात्रपञ्चमात्रौ ॥ ४५ ॥

मंतिअ इति ।

---

१ प्रथम AB. २ द्वितीयो AB

मंतिअओ सतुरंगओ तइ[अ]रहंगअम्मि
सोच्चिअ होइ चउत्थओ पंचसवाणअम्मि ।
छट्ठो अ पउमराअओ मणहरबंधअम्मि
जाणसु पंकअवअणिए ललिआपाअअम्मि ॥ ४६ ॥ ललिता ।

इय दुवईओ गणसमाओ सम्मत्ताओ ॥

मन्त्री सतुरगस्तृतीयरथाङ्गे स एव भवति चतुर्थः पञ्चमवाणे ।
षष्ठश्च पद्मरागो मनोहरवन्धे जानीहि पङ्कजवदने ललिता प(पा)दे ॥ ४६ ॥

तुरंगमसहित मन्त्रिण प्रथम जानीहि । अनन्तरे तृतीये पञ्चमात्र तत. स एव तुरगश्चतुर्थो भवति । पञ्चमो वाणो यस्मिन्निति पादाविशेषणम् । अन्ते पद्मरागो गुरुर्यस्येति च । ॥ ४६ ॥

एव सप्त गणसमा उक्ताः । इदानीमर्धसमाः आह—विउलाइ[1] इति ।

विउलाइ पाआ
करसुरगयएहिं होंति ।
णेउ(णव)रं समा से
पमुहट्ठिअवारणिंदा ॥ ४७ ॥ विपुला ।

विपुलायाः पादा करसुरगजैर्भवन्ति ।
केवल समावस्या. प्रमुखस्थितवारणेन्द्रौ ॥ ४७ ॥

विपुलायाः सर्वे करेणान्तगुरुणा [चतुर्मात्रेण] तया सुरगजेनादिल्घुना पञ्चमात्रेण भवन्ति । केवल च समा(मौ) द्वितीयचतुर्थौ अस्या' प्रमुखे स्थिते[न] वारणेन्द्रेण[2] चतुर्मात्रो(त्रे)[णो]पलक्षितौ । अतएव चार्धसमा । प्रथमद्वितीयपदरचितार्धस्य तृतीयचतुर्थविरचितापरार्धेन[3] सादृश्यम् । णवरमिति निपात' केवलार्थ ॥ ४७ ॥

रअणाअरे गओ[4]
पत्थिवओ सह(हा)रओ ।
चवलाइ जुज्ज(ज्झ)ए
रहकणआ धअग्गअं ॥ ४८ ॥ चवला[चपला] ।

रत्नाकरे गजः पार्थिव[5] सह(हा)[रः ।
चपलाया युद्धे रथकनकौ] ध्वजाग्रम् ॥ ४८ ॥

चपलायाः रत्नाकरे विषमपादस्थाने प्रथम गजः कर्तव्य पश्चात्पार्थिवो मध्यगुरुः । अन्ते च हार । युद्धे पुन. समस्थाने रथकनकौ च चतुर्मात्रपञ्चमात्रौ । कनक आयुधविशेष' । अन्ते च ध्वजाग्रम् । रत्नाकर. सागर' ॥ ४८ ॥

रह(य)णाअर इति

---

१ उविलाए AB. २ वरुणेन्द्रेण AB ३ तासरावेन AB. ४ गरओ AB. ५ राजपार्थिवः AB.

रयणाअर[अ]म्मि
　रहतुरआ हारओ अ ।
समरे स(सु)मुहीअ
　जोहजुअं सुरगवो अ ॥ ४९ ॥ सुमुखी ।

रत्नाकरे रथतुरगौ हारश्च ।
समरे सुमुख्याः योधयुग सुरगजश्च ॥ ४९ ॥

स(सु)मुख्याश्चतुर्मात्रद्वयं गुरुश्च । विषमपादयोस्तु पञ्चमात्रेणादिलघुना आधिक्यमिति तात्पर्यम् ॥ ४९ ॥

कुण हार इति

कुण हारविराम तिअं तो
　सारसिआई(इ) कराण समुद्दे ।
समरंगणयम्मि अ मुद्धे
　पाअ अ तिण्णि मणीण जुअं च ॥ ५० ॥ सारसी ।

कुरु हारविरामे त्रिकं तावत् सारसिकायाः कर(रा)णां समुद्रे ।
समराङ्गणे च मुग्धे पादत्रिकं मण्योर्युग च ॥ ५० ॥

हे मुग्धे सारसिकाया तावत्कराणामन्तगुरूणा त्रिक हारविरामं कुरु समुद्रे विषमपादे । समराङ्गमे(णे) समे पादानामादिगुरूणा त्रिकं गुरुद्वय चान्ते । ता तावदर्थे ॥ ५० ॥

कुण भामिणि इति ।

कुण भामिणिआएँ पिए
　सारसिआइ कराण तिअं ।
समरंगणअम्मि अ सि(से)
　पायं अ तिण्णि सणेउरआ ॥ ५१ ॥ भामिनी ।

कुरु भामिन्या. प्रिये सारसिकाया. कराणां त्रिकम् ।
समराङ्गणे चास्याः पादत्रिकं च सनूपुरम् ॥ ५१ ॥

सारसिकायाः सबन्ध(न्धि) करत्रिक पादत्रिक च गुर्वन्त विषम[सम]पादविषये विधाहे । सारसिकेवान्तेगुरुणा रहिता भामिनी भवतीत्यर्थ. ॥ ५१ ॥

पाअतिअं इति ।

---

१ वश्रुति ? Com　२ योगयोग AB　३ समयो. AB　४ कारणा AB　५ गुरुगुरुद्वय AB　६ पायतिभ च सणेउरअं Com　७ कररणात्रिकम् AB　८ विपयो विधेति AB

पाअं[1] अ तिण्णि सणेउरआ
रअणायरअम्मि पसण्णअए ।
स(सं)जुअअम्मि अ होइ पिए
करपल्लवआण चउक्कमिह ॥ ५२ ॥ प्रसन्ना ।

पादत्रिकं च सनूपुरं रत्नाकरे प्रसन्नायाः ।
संयुगे च भवति प्रिये करपल्लवानां चतुष्कमिह ॥ ५२ ॥

प्रसन्नायाः समपादस्थाने पादत्रयं[2] नूपुरेना(णा)न्तस्थितेन सह वर्तमान(नं) विधेयम् । समस्थानेऽन्तगुरवश्चत्वारः कार्याः । सयुगः सग्रामः । रत्नाकरः समुद्रः ॥ ५२ ॥

जोहरह इति ।

जोहरहंग संदणआ
णंदाइ हुवन्ति साअरए ।
तुरअगअंदअ(प)त्थिवआ
तस्सेअ धंवो[3] अ संजुवए[3] ॥ ५३ ॥ नंदा ।

योधरथाङ्गस्यन्दनाः नन्ता(न्दा)या भवन्ति सागरे ।
तुरगगजेन्द्रपार्थिवास्तस्या एवं ध्वजश्च संयुगे ॥ ५३ ॥

नन्दायाः सागरे विषमे चतुर्मात्रवर्ण(गण)योर्मध्ये पञ्चमात्रो भवति । तस्या एव सयुगे तुरगगजेन्द्रपार्थिवाश्च चतुर्मात्रा अविशेषेण[5] तृतीयश्च[4] मध्यगुरुरित्यर्थः । तस्मिंश्च समे ध्वजोन्ते[6] कार्यः । अत्र सागरे सामान्येन चतुर्मात्रोऽन्ते विहितस्तथाप्यन्तगुरुष्कार्यः । न केवलमिह यावत्सर्वत्रैवान्ते यत्र चतुर्मात्रादिगणो विधीयते तत्रान्तगुरूणामेव विधान नान्येपामित्यस्माभिरुदाहरणैश्चाभ्यूहितम् । अन्यत्र गज एव गजेन्द्रः इति चतुर्मात्रस्यैव विधाने(न) न पञ्चमात्रस्यादिलघु(घो)रित्येतदप्युदाहरणाभ्यूहितमस्माभिः ॥ ५३ ॥

सागरए इति ।

साअरि(र)ए गइंदओ
सेआइ रहंगअं धओ ।
संजुअए तुरंगओ
जोहो अ सपत्थिओ मणी ॥ ५४ ॥ श्वेता ।

---

१ पाअतिअ च सणेउरअ Com २ पादासयो AB. ३ वस्तुति ? ववोओ अ सजुवए AB. ४ वध AB. ५ चविशेषणतृतीयाश्च AB. ६ ध्वजेन्ते कार्ये AB.

इअ दुवईओ अद्धसमाओ समत्ताओ। इअ कइसिट्ठविित्तजाईसमुच्चए तइओ णिअमो सम्मत्तो ॥

सागर(रे) गजेन्द्रः श्वेताया रथाङ्गं ध्वजा(जः) ।
सं[1]युगे तुरंगमो योधश्च सपार्थिवो मणिः ॥ ५४ ॥

श्वेतायाः विषमे[2] चतुर्मात्रपञ्चमात्रत्रि[3]मात्राः सं[4]युगे तु त्रयश्चतुर्मात्राः गुरुश्च । तत्र तृतीयश्चचतुर्मात्रो मध्यगुरुरित्यर्थः ॥ एवमेताः साकल्येन द्विपञ्चाशद् द्विपद्य उक्ताः ॥ ५४ ॥

इति तृतीयो नियमः ।

---

१ संयोगे A २ विषमेव चतु० B ३ द्विमात्रा AB ४ सयोगे AB.

चतुर्थो नियमः ।

इदानीमवसरप्राप्तां गाथामाह—अट्ठमअं इति ।

अट्ठमअं सोलहमं च कुण मणी गंधअं चउद्दहमं ।
छट्ठं गाहाइ थणं दिअं व परिसेसजोहाइ ॥ १ ॥

अष्टमं षोडशं च कुरु माणिं गन्धं च चतुर्दशम्
षष्ठं गाथाया स्तनं द्विजं वा परिशेषयोधायाः ॥ १ ॥

गाथाया अर्धयोपि(र्हि) साकल्येन षोडश स्थानानि भवन्ति । तत्राष्टमं षोडशं गुरुं कुरु गन्धं लघु च चतुर्दशं षष्ठं च स्तनं मध्यगुरुं द्विजं लघुचतुष्टयं वा । किंभूतायाः । परिशेषाः अष्टम-षोडशचतुर्दशषष्ठेभ्यो निखिला योधा यस्याः सा । तथा तस्या अत्र च 'गाहाखंध' (१.२३) इत्यादिना समविषमयोर्मध्यगुर्वो(रो)र्विधिप्रतिषेधौ । उदाहरणम् । ॥ १ ॥

अस्या एवेति भेदप्रदर्शनार्थमाह—गाहा इति ।

गाहापत्थारमहोवहिस्स तीसक्खरा समारंभे ।
जाणह पंचावण्णक्खराइं तस्सेअ विरमम्मि ॥ २ ॥

गाथाप्रस्तारमहोदधेस्त्रिंशदक्षरां समारम्भे ।
जानीहि पञ्चपञ्चाशदक्षरां च तस्यैव विरामे ॥ २ ॥

महोदधेभिन्नम(?)प्रस्तारः षष्ठे नियमे उक्तः तस्य समारम्भे त्रिंशदक्षरां गाथां जानीहि । विरामेऽन्ते चास्य पञ्चपञ्चाशदक्षरामिति । अनेन प्रकारेण गाथाया जातय उच्यन्ते यथा मनुष्यत्वस्य ब्राह्मणादयः । न केवलमिह यावत्सर्वत्रैव मात्रावृत्ते जातिमात्रस्य लक्षणमुच्यते । एतच्च षष्ठ एव प्रतिपादयिष्यामः ॥ २ ॥

अस्य चाद्यन्तवर्तिनो गाथाद्वयस्य स्वरूपमाह—सत्तावीसं इति ।

सत्तावीसाँ हारा जीसे दीसंति तिण्णि गंधाइं ।
सा गाहाणं गाहा आई तीसक्खरा लच्छी ॥ ३ ॥

सप्तविंशतिर्हारा यस्याः दृश्यन्ते त्रीणि गन्धानि ।
सा [गाथानां] गाथा आद्या त्रिंशदक्षरा लक्ष्मीः ॥ ३ ॥

सा गाथा लक्ष्मीर्नाम सर्वासां गाथानां प्रथमा । किंभूता । यस्या हारा गुरवः सप्तविंशतिर्भवन्ति द्वयोरप्यर्धयोर्लघूनि त्रीणि । षष्ठे स्थाने स्तने लघुद्वयस्य सम्भवाच्चतुर्दशे चैकस्येति ॥ ३ ॥

द्वितीयासौ पञ्चपञ्चाशदक्षरा तस्या इदानीं लक्ष्यद्वारेण स्वरूपमाह—गगणअल इति ।

---

१ गन्धं AB २ गन्धे AB ३ मष्टेभ्यो AB ४ यथा AB ५ As in Chapter III, I drop even here the formulaic representation as it is very unreliable ६ बश्रुति ७ सत्तावीस Com ८ गणनं AB

गयणअलविसअपसरिअमणहरससिकिरणणिअरहिअतिमिरं ।
अणुहवसु सुहअ वहुमअ सललिअ[2]अणररसिअ रअरअणिं ॥ ४ ॥ हसवधूः ।

गगनतलविषयप्रसृतमनोहरशशिकिरणनिकरहततिमिराम् ।
अनुभव सुभग बहुमत सललित बहुरसिक रतरजनीम् ॥ ४ ॥

कस्यचिन्नायकस्य कुपितप्रसन्नायां नायिकायामुपालम्भगर्भं वयस्यावचनम् । हे सुभग इमां रतोपलक्षिता रजनीमनुभव । अस्या रजन्या सुखेन विहरेत्यर्थः । किंभूता रजनीम् । गगनतलविषये [3]नभोभागोदरे प्रसृत उद्गतो योऽसौ मनोहरः शशी तदीयेन किरणनिकरेण रश्मिसमूहेन हतं तिमिरं यस्या तामेवविधाम् । हे बहुमत अनेकै[4]चिन्तित । सल[5]लित सविलास । बहुरसिक अस्थिरप्रकृते । त्रीण्येतान्यामन्त्रणपदानि । एतज्जातिषड्विंशकस्योपलक्षण गाथायुगलकम् ॥ ४ ॥

यथा चैता षड्विंशतिर्भवन्ति तथा दर्शयन्नाह—**साअर** इति ।

पत्था[6]रसाअरवरे रयणे लुत्ते रसम्मि वड्ढंते ।
जाणह कमेण कंते[7] छव्वीसं होंति गाहाओ ॥ ५ ॥

सागरप्रस्तारवरे रत्ने लुप्ते रसे वर्धमाने ।
जानीहि क्रमेण छन्दसि षड्विंशतिर्भवन्ति गाथाः ॥ ५ ॥

सागरश्चासौ प्रस्तार सागरप्रस्तार[8]ः (तस्मिन्) लक्ष्मीं स्थापयित्वा ततः प्रथमगुर्वक्षरे स्थान्यादेशभावेन रसेन लुप्ते कते सत्येकत्रिंशदक्षरा भवति द्वितीया । अनन्तर द्वितीये रत्ने रसेन लघुद्वयेन लुप्ते सति च कृतौ (?) द्वात्रिंशदक्षरा भवति ॥ ५ ॥

लच्छी ऋद्धि(द्धी) बुद्धी लज्जा विज्झू[9] अ मोलई दीही ।
गोरी राई जोण्हा छाआ कंती महामई कित्ती ॥ ६ ॥
मुद्धा मणोहर[10]ा रोहिणी विसाला सुहा सिवा हरिणी ।
चक्काई सारसिआ कुररी हंसी अ हंसवहुअत्ति ॥ ७ ॥
दोहिं गीईहिं गाहाणामाइं भणिआइं ॥

[लक्ष्मी]ऋद्धिर्बुद्धिर्लज्जा विद्या क्षमा च दीर्घा च ।
गौरी राजिर्ज्योत्स्ना छाया कान्तिर्महामतिष्कीर्तिः ॥ ६ ॥
मुग्धा मनोहरा रोहिणी विशाला सुधा [शिवा] हरिणी ।
चक्रवाकी सारसिका कुररी हंसी च हंसवधूरिति ॥ ७ ॥

पूर्वोक्तस्यैव रत्ने लुप्ते रसे च वर्धमान इत्येतस्य प्रकारान्तरमाह—**कण्णकर** इति ।

कण्णकरचलणविप्पंसएहिं पढमट्ठिएहिं जाणिहिह ।
जहसंखं भ(स)व्वाणं जाईणं वण्णपरिवाडिं ॥ ८ ॥

---

१ हअ Com २ सललिअ वहुरसिअ Com ३ णभोगोदरे ४ अनेकचिन्त AB ५ सलिल AB ६ साअरपत्थारवरे Com ७ छंदे Com ८ Both A and B add सागरप्रस्तारश्चासौ सागरप्रस्तार ९ विज्जा खमा अ दीही अ Com १० मणोहरमा AB

कर्णकरचरणविप्रांशकैः प्रथमस्थितैर्जानीहि ।
यथासंख्य सर्वासां जातीनां वर्णपरिपाटीम् ॥ ८ ॥

जातीना लक्ष्याद्याना वर्णपरिपाटीमनेन क्रमेण ज्ञास्यथ । प्रथमं कर्णेन गुरुद्वयेन स्थितेनानन्तर करेणान्तगुरुणा पश्चाच्चरणेनादिगुरुणा ततोऽपि विप्राशकेनेति एवं प्रत्येकमशंक यावद् गाथा हंसवधूः तावत्कार्यम् । अत्र च नाशका विवक्षिता इति । अपि तु क्रमेण रत्नस्य रसेन लोप इति । तेन करचरणयोरप्याविवक्षा । सर्वथा गुरोर्लघुद्वयेन लोपादक्षरवृद्धिः प्रयोजनम् । अन्ये पुनरेतद्योगात् गाथाप्रभेदाः कोटिश. सन्ति तत्परमिति कथयन्ति । तदपि साधीयः । अस्मिंस्तु करचरणयोर्विवक्षैव । एतत् षष्ठानुवादपर तत्र विस्तरेण प्रदर्श्यमानत्वात् ॥ ८ ॥

स्कन्धकलक्षणमाह—**पंचण्ह** इति ।

पंचण्ह सया पुरओ दुण्ह अ मग्गेण वारणाण णियमिअओ ।
जह दइए पुव्वद्धे तह पच्छद्धेवि खंधअस्स णरिंदो ॥ ९ ॥
खंदएण खंदअस्स लक्खणं भणिअं ॥

पञ्चानां सदा पुरतो द्वयोश्चाग्रे वारणानां नियमितः ।
यथा दयिते पूर्वार्धे तथैव पश्चार्धे[ऽपि स्कन्धकस्य नरेन्द्रः] ॥ ९ ॥

पूर्वार्धपश्चार्धे स्कन्धकस्य सदृशे कर्तव्ये इत्यर्थः ॥ ९ ॥

गाथावत्स्कन्धकजातयो भवन्तीत्याह—**छव्वीसं** इति ।

छव्वीसं जह गाहा रअणे लुत्ते रसम्मि वड्ढंते ।
एक्कोणत्तीसं खंधअस्स णामाइं तह अ पिए ॥ १० ॥

षड्विंशतिर्यथा गाथा रत्ने लुप्ते रसे च वर्धमाने ।
एकोनत्रिंशत्स्कन्धस्य भेदास्तथैव ॥ १० ॥

स्पष्टार्था गाथा ॥ १० ॥

एतेषां नामान्याह—**पवण** इति ।

पवणरविधणअहुअवहसुरणाहसमुद्दवरुणससिसेला ।
महुमाहवमअणजअन्तभमरा(र)सुअसारसमज(ऊ)रा ॥ ११ ॥
हरिहरिणहत्थिकाओ कुम्मो णअविणअविक्कमोच्छाहा ।
धम्मत्थकामसहिआ णवी(त्ती)सअ खंधआ होंति ॥ १२ ॥

खंदअणामाइं ॥

पवनरविधनदहुतवहसुरनाथसमुद्रवरुणशशिशैला ।
मधुमाधवमदनजयन्तभ्रमरशुकसारसमयूराः ॥ ११ ॥

१ ममुक AB २ भेआ[पिए]तहवि Com ३ कामवकुन्दणअ० Com

हरिहरिणहस्तिकर्दवकुंदनयविनयविक्रमोत्साहाः ।
धर्मार्थकामसहिता एकोनत्रिंशत्स्कन्धका भवन्ति ॥ १२ ॥

गीतिलक्षणमाह—**गाहा** इति ।

गाहापुव्वद्धं जीअ सुअणु पुव्वंद्धपच्छिमद्धाइं ।
सा पिंगलेण गीइत्ति दाविआ सव्वछंदवित्ताण ॥ १३ ॥

गाथापूर्वार्धमिव यस्याः पूर्वार्धपश्चार्धे ।
सा पिङ्गलेन गीतिरिति दर्शिता सर्वछन्दोविदाम् ॥ १३ ॥

गाथैव गीतिः । इयांस्तु विशेषः । चतुर्दशेऽपि यत्र लघोर्विधानं तत्रास्या मध्यगुरुर्विधेय इति सर्वच्छन्दोविदां प्रथमं पिङ्गलेन दाविआ दर्शिता प्रकटीकृता ॥ १३ ॥

किंच **गाहापच्छद्धं** इति ।

गाहापच्छद्धं विअ पुव्वद्धं पच्छिमद्धं च ।
जीसे सा उवगीई तेणं चिअ लक्खणे भणिआ ॥ १४ ॥

गाथापश्चार्धमिव पूर्वार्धं पश्चिमार्धं च ।
यस्याः सा उपगीतिस्तेनैव लक्षणे भणिता ॥ १४ ॥

तेनैव पिङ्गलेन सा स्वस्मिन् लक्षणे उपगीतिः भणिता । यस्या गाथा[याः] पश्चार्धेन सदृशमेव द्वयेपि लक्षणं भवति । षष्ठचतुर्दशयोर्लघुरित्यर्थः ॥ १४ ॥

एवं द्विपद्यादिवृत्तजातिषट्कमुक्तम् । इदानीं विलासिन्यादीनामाह—**मणिविराम** इति ।

मणिविरामबाणाण मज्झओ
घित्तुआण दो दे सिलीमुहो(हे) ।
पत्थिवं च तइअं विलासिणी-
पाअअम्मि फुडणेउरिल्लिए ॥ १५ ॥

मणिविरामबाणानां मध्याद् गृहीतानां द्वौ देहि शिलीमुखौ ।
पार्थिव च तृतीयं विलासिनीपादे स्फुटनूपुरवति ॥ १५ ॥

बाणाः पञ्चमात्रा गणाः । तेषां त्रयो मणिविरामा गुर्वन्ताः पञ्च लघुविरामाः । त्रयः गुर्वन्ता. सुरगजाद्यास्तेषां गृहीतानां मध्यादन्यतमौ द्वौ पञ्चमात्रौ देहि । ततस्तृतीयः पार्थिवः । किंभूते पादे । स्फुटः प्रकटो नूपुरो गुरुरन्ते यस्य ॥ १५ ॥

पढमा इति ।

पढमा बीआ हुअंति जोहआ
तइअणिरूविअणरिंदविप्पआ ।

---

१ पुव्वद्ध विअ जीए पुव्वद्ध० Com. २ छन्दोवित् AB. ३ लक्षणेन AB. ४ गतीताना AB. ५ स्फुराति नूपुरवति AB.

चउगणघडिआ विरामवाणआ
होंति अ णिव्वाइआइ पाअआ ॥ १६ ॥

प्रथमकद्वितीयौ भवतो योधौ तृतीयनिरूपितनरेन्द्रविप्राः ।
चतुर्गणघटिता विरामबाणा भवन्ति [च] निर्वापितायाः पादाः ॥ १६ ॥

निर्वापिताया एवंभूताः पादा. भवन्ति । एवं प्रथमद्वितीयौ बाणौ भवतः । तृतीयेन च निरूपितो नरेन्द्रो विप्रो वेति पादविशेषणम् । स्पष्टमन्यत् ॥ १६ ॥

सतुरंग इति ।

सतुरंगरहस्स देसु पुरओ
णिअमेण थणं व विप्पअं वा ।
विरेम अ करं च कण्णअं व
सुंदरि बाणासिआइ पाए ॥ १७ ॥

सतुरङ्गरथस्य देहि पुरतो नियमेन स्तनं वा विप्र वा ।
विरामे [च] करं वा कर्णं वा सुन्दरि बाणासिकाया. पादे ॥ १७ ॥

सह तुरङ्गेन योऽसौ वर्तते रथस्तस्य पुरतोऽग्रे नियमेन स्तन वा विप्रं वा देहि । विरामेऽन्ते करं वा कर्णं वा । अनेन मन्दबुद्धिव्युत्पादने मुखेदोदाहरण पर्यन्ते (?) यस्मात्स्तनस्थाने विप्रो भवत्येव । तथान्ते करकर्णवर्जमन्यस्य नैवावकाश इति ॥ १७ ॥

तुरअ इति ।

तुरअ सुअण्णआ
उवहिंवि(मि) विइण्णआ ।
सुंदरि खञ्जए
समरे रसमज्झआ ॥ १८ ॥

तुरगसुपर्णावुदधौ वितीर्णौ ।
सुन्दरि खञ्जके समरे रसमध्यौ ॥ १८ ॥

उदधौ विषमपादे तुरङ्गसुपर्णौ वितीर्णौ दत्तौ । समरे समपादे रसो मध्ये येषां तौ । सुपर्णो गरुडः ॥ १८ ॥

देहि इति ।

दे सुचामरसरूअसहारे
दिट्ठिअं सरसंअम्मि णरिंदे ।

---

१ द्वितीय० AB २ द्वितीयौयौ AB ३ ननरेन्द्रो AB ४ वाणवासिकाया· AB ५ विपुर AB ६ सनेन समध्यौ AB ७ विस्तीर्णौ AB ८ सचामर Com ९ सरासअम्मि गअं णरिंदो AB

मग्गओ[1] सुरगअस्स णिउत्ते
पाअम्मि परिणंदिअस्स ॥ १९ ॥

देहि सचामररूपसहारे दृष्टिं सरसे[2] नरेन्द्रे ।
मार्गतः सुरगजस्य नियुक्ते पादे[3] परिनिन्दितस्य ॥ १९ ॥

परिनिन्दितस्य पादे दृष्टिं देहि । किंभूते । सह चामरेण वर्तमाने तथा सरूपे सह(हा)रे च। सह रसेन वर्तते योऽसौ नरेन्द्रः तस्मिन्नपि दृष्टिं देहि । किंभूते नरेन्द्रे । मार्गतः पृष्ठतः सुरगजस्य आदिलघोर्नियुक्ते ॥ १९ ॥

विइआविरुद्ध इति ।

बीआविरुद्धथणहारए
आणंदिअस्स कुण पाअए ।
जोहं सरहं सतुरंगअं
विरमे अ वरोरु धअग्गअं ॥ २० ॥

द्वितीयाविरुद्धस्तनहारे आनन्दितस्य कुरु पादे ।
योधं सरथ सतुरङ्गं विरामे च वरोरु ध्वजाग्रम् ॥ २० ॥

आनन्दितस्य च पादे चतुर्मात्रास्त्रयश्चतुर्थस्तु त्रिमात्रः कार्य इति तात्पर्यम् । द्वितीये[4] च सामान्येन मध्येगुरोरविरोध[5] इति ॥ २० ॥

सतुरंगम इति ।

सउरंगमए सवारणे[6] सजोहए[6]
विहआहिवइं व विसहरं व मुद्धिए ।
ठविअम्मि ठँवे अंतिमए(ध)अवडावए
महुरक्खरए कीलणअस्स पाअए ॥ २१ ॥

सतुरङ्गमे [स]वारणे [स]योधे विहगाधिपतिं वा विषधरं वा मुग्धे ।
स्थापिते देहि अन्तिमध्वजपताके मधुर(रा)क्षरे क्रीडनकस्य पादे ॥ २१ ॥

क्रीडन[क]स्य [पादे] चतुर्मात्रगणत्रये स्थापिते मध्यलघोश्चतुर्थगुरोर्वा[8] स्थितिर्विधेयेत्यर्थः । अन्तिमे(मा) ध्वजपताके(का) यस्येति पादविशेषणम् । विहगाधिपतिर्गरुडः । विषधरो भुजगाधिपः ॥ २१ ॥

हाररसाण इति ।

हाररसाण तिअम्मि णअंगि विइण्णे
देसु[7] सणेउर[रू]अजुअं चं पुरिल्लं[9]

१ समग्गओ AB. २ सरथे AB ३ परे AB ४ द्वितीयेन AB. ५ मध्येगुरुः AB ६ सवारणज्जेहए AB
७ देसु Com ८ चतुर्थगुरोर्वा AB ९ सफुरिल्लं AB.

चामरअं कडअं च वरोरु विरामे
दूरसमुज्जलअम्मि तरंगअपाए ॥ २२ ॥

हाररसयोस्त्रिके नताङ्गि वितीर्णे देहि[1] सनूपुररूपयुग च पौरस्त्यम् ।
चामरं कटक च वरोरु विरामे दूरसमुज्ज्वले तरङ्गकपादे ॥ २२ ॥

हारश्च रसश्च हाररसौ तयोस्त्रिके वितीर्णे दत्ते त्रि'कृत्वः चरणे स्थापित इत्यर्थः । पश्चात्सनूपुररूपयुग च पौरस्त्य पुरोभव देहि चरणमेव । विरामेन्ते च चामरकटके गुरुद्वयमित्यर्थः । वरौ श्रेष्ठौ ऊरू यस्या' । आमन्त्रणम् ॥ २२ ॥

भवति इति ।

भवति मुद्गरो हरिर्योधस्तस्याग्रतो मौक्तिकं प्रिये ।
जातु सा(श)म्यायाश्चतुर्भागं मात्राधिकं विद्धि पार्थिवे ॥ २३ ॥

शम्यांया[3]' पाद एंवविधो भवतीति विद्धि जानीहि यस्य प्रथम मुद्गर' पञ्चमात्रो भवति पश्चाद्धरिरश्वस्तदनु योधः । तस्य च योधस्य अग्रतः पुरो मौक्तिक गुरु किं च पार्थिव(वे) मध्यगुरौ सतु(ति) जातु कदाचित्त चतुर्भाग मात्रयैकयाधिकं विद्धि । पार्थिवस्थाने कदाचित्पञ्चमात्रो विधेय इत्यर्थः । अनेन वचनेनोदाहरणेन चेद[6] दर्शितमाचार्येण यथा सामान्यसञ्ज्ञयापि मध्यगुरुरस्मिन् ग्रहीतव्यमि(इ)ति । अपरमपि अनेनोदाहरणेन दर्शित यत् संस्कृतेनैतच्छम्यं वृत्त, न वध्यते भापान्तरेणेति ॥ २३ ॥

विसमट्ठाण इति ।

विसमट्ठाणाविरुद्धस्तनतइअदिअणरिंदआ
णिद्दिट्ठा कउ(इ)वरेहिं रविओ(ते)रहवीसामआ ।
ठवेसु अहिअक्खराइ छंट्ठणिरूविअवाणआ
अंसावि हु सेसआ गअतुरअएहिं णिवद्धआ ॥ २४ ॥

विपमस्थानाविरुद्धस्तनतृतीयद्विजनरेन्द्राः निर्दिष्टाः कविवरै. रवित्रयोदशविश्रामा' ।
स्थापयाधिकाक्षराया विरामनिरूपितबाणा' अंशकौ अपि शेषौ गजतुरगैर्निवद्धाः ॥ २४ ॥

अधिकाक्षराया एवभूता ये अशका निर्दिष्टास्तान्स्थापय । विप[म]स्थानेष्वविरुद्धो मध्यगुरुर्येषाम् । अन्यच्च रविभिर्द्वादशभिस्तथा त्रयोदशभिर्यति. पदसमाप्तिर्येपामिति पष्ठे च निरूपितो बाणो येषा ते तथा । अन्यच्च तृतीयषष्ठाभ्यां शेपा ये ते गजतुरगैः सामान्येन चतुर्मात्रैर्निवद्धाः कार्या. ॥ २४ ॥

पढम इति ।

---

१ विस्तार्णे देहे AB २ चतुर्थभाग AB ३ मध्याया पादधूपविधो AB ४ द्धरेम्वर AB ५ योधेक AB ६ चद्रदर्शित० AB ७ छट्ठविरमणिरू० AB In trans Com reads विरमणिरू० but explains the reading छट्ठणिरू० ८ गान AB ९ वरैरपेत्रयोदिनाविस्रामा AB १० असकाविशेपा AB ११ तासद्विपय AB १२ पष्ठाया AB

पढमचउत्थजोहरहपंचमकण्णाए
वीअतईअहोइसुरहत्थिसुअण्णाए ।
कूला दीहवण्णएआरविलुत्ताए
जा[१]सु विसग्गु[२] होइ णक्कोडअपाआए ॥ २५ ॥

प्रथमचतुर्थयोधरथपञ्च[म]कर्णः द्वितीयतृतीयभोगिसुरहस्तिसुपर्णः ।
कूला दीर्घवर्णैकारविलुप्तः यस्य विसर्गो भवति नर्कुटपादः ॥ २५ ॥

एवंभूतो नर्कुटस्य पादो भवति प्रथमचतुर्थयोर्योधरथौ यस्य पञ्चमे च कर्णो गुरुद्वयं स प्रथमचतुर्थयोधरथपञ्चमकर्ण । द्वितीयतृतीययो स्थानयोः भोगिसुरहस्तिसुपर्णो यस्य स तथा । भोगी भुजगेन्द्रः । सुरहस्ती सुरगज. । सुपर्णो गरुड. । कु(कू)ला देशीपदं पंक्तिपर्यायः । तेनैतदुक्त भवति । अन्तिमो विसर्गो दीर्घवर्णेनैकारेण विलुप्तो यस्य भवति । पादान्ते विसर्गस्य स्थान्यादेश-भावेन आए इति विधेयमित्यर्थ. । उदाहरणमुखेन च दर्शित तथा पुंलिङ्गस्यैवाकारान्तस्यायं विधिर्ना-न्यस्येति । तथा चोक्तम्—' **अतः स आएन्दुंसि र(न)र्कुटक** इति ॥ २५ ॥

जण्णिउत्त इति ।

जं[३] णिउत्तसरतोमरजोहतुरंगअं
विरमअम्मि दूरुज्जलवण्णधअग्गअं ।
तं विआण सुपरिट्ठिअजइरमणिज्जअं
छंदअम्मि छउओअरिए र[४]मणिज्जअं ॥ २६ ॥

यन्नियुक्तशरतोमरयोधं[५]तुरंग विरामे दूरोज्ज्वलवर्णध्वजाग्रम् ।
तद्विजानीहि सुपरिष्ठितयतिरमणीयकं छन्दसि छातोदरिके रमणीयकम् ॥ २६ ॥

हे छातोदरिके तद्वृत्त अस्मिन् छन्दसि रमणीयकमिति जानीहि । किंभूतम् । यस्मिन्नियुक्ताः शरतोमरयोधतुरगा पञ्चमात्रद्वय चतुर्मात्रद्वय चेत्यर्थः । तोमरः प्रहरणविशेषः । विरामेन्ते दूरमत्यर्थं उज्ज्वलवर्ण ध्वजाग्र यस्य । वर्णा अक्षराणि । सुपरिष्ठिताभिश्च यतिभिर्विरामै रमणीयम् ॥ २६ ॥

तिण्णि तुरंगा इति ।

तिण्णि तुरंगा णेउ[६]रओ विप्पाइक्का कण्णु ।
दुवहअपच्छद्धेवि वद ल[७]क्खणु एउ ण अण्णु ॥ २७ ॥

त्र्य[८]स्तुरंगा नूपुरो द्वौ पदाती कर्णः ।
द्विपद(थ)स्य पश्चा[९]र्धेपि तदेव स्थापय नान्यत् ॥ २७ ॥

चतुर्मात्र[१०]त्रयं गुरु च स्थापयित्वा चतुर्मात्रद्वय[११] गुरुद्वय चेति स्थापय द्विपथस्य पूर्वार्धेपि पश्चार्धे

१ जसु विगु AB २ कुल AB ३ जणउत्त AB ४ रम्मनिज्जअ AB ५ योरधस्तुरङ्ग AB ६ अणुरउ AB
७ A drops ए from एउ, Com seems to read त मा ठवेहि अण्णु for the 4th line, but what it reads for वद is not clear ८ त्रिस्तुरग नूपुरौ द्वौ पदाती कर्णौ AB ९ पश्चार्धे पित्त मास्थापयान्य AB
१० चतुर्मात्र to यित्वा repeated immediately AB ११ त्रय AB

तथैव नान्यत्किंचिदिति । अत्र च सनूपुरचतुर्मात्रत्रयेऽनीते यतिर्विधेयेत्युदाहरणेनोक्तम् ॥ २७ ॥

वि(व)इआलिअ इति ।

वेआलिअअं रसो[3] लसौ[3]
जइ आभाससि चारुणेत्तिए ।
तो मागहिअत्ति लक्खणे
णिस्माअंति मुणेहि सुंदरि ॥ २८ ॥
मागहिआ वइआलिअरूवेण ॥

वैतालीय रसौ लशौ[6] यदा(द्या)भाषसे चारुलोचने ।
ततो मागधिकामिति लक्षणे निर्मितामिति जानीहि सुन्दरि ॥ २८ ॥

वैतालीयस्य लक्षण वक्ष्यति । तस्मिन् रेफसकारौ यथासख्येन लसौ(शौ) भाषसे उच्चारयसि तदा ता मागधिकामित्यस्मिंल्लक्षणे निर्मितामुपरिष्टामिति मुणेहु जानीहि । एतदुक्त भवति । वैतालीयमेव [मागधिका] । मागधिकया भाषया समुच्चारणात् ॥ २८ ॥

मात्रालक्षणमाह—**विसमच्छंद** इति ।

विसमच्छंद पाअ मत्ताहु
वे तिण्णि अ सुम्मसुहि
मणितूंररसगणविणिम्मिअ ।
ताहु पाअहु मज्झिमहु
णिउणएहिं लक्खणु णिरूविओ ॥ २९ ॥
मात्रा चारुनेत्तिआ ।

विषमच्छन्दसः प(पा)दा मात्राणां भवन्ति द्वौ त्रयश्च सौम्यमुखि मणिरूपरसगणैर्विनिर्मिताः ।
तासां प(पा)दानां मध्यमानां निपुणैर्लक्षण निरूपितम् ॥ २९ ॥

मात्राणा पञ्च पादा विषमच्छन्दसोऽसदशाक्षरा भवन्ति । मणिरूपेत्यादिना मात्रा[या] गुरुलघुरचनां अभ्यनुज्ञातवान् । नामभेदमाश्रित्य मध्यमाना लक्षणं निरूपितम् । न तु मध्यमानामेव यस्मात्प्रथमतृतीयपञ्चमांस्त्रयोदशभ्यो मात्राभ्य षोडश यावद्विधेयाँ. । एवं द्वितीयचतुर्थयोरेकादशभ्यः चतुर्दश यावदित्युदाहरणात् शास्त्रान्तरेभ्यो लक्ष्याच्चास्माभिरधिगतम् । यदि नामाचार्यस्यैवमभिमतं न स्यात्तदग्रे 'दुवईगणसम्माण' (६'५१) इत्यादि स्ववचनविरोध. स्यात् । यस्मात्पादेष्वनियमे मात्राणा न केवल लघुक्रियाया विघटन यावत् सख्याया अपीति । अपभ्रष्टेन मात्रा रचनीयेत्ये[12]-तदप्युदाहरणेन दर्शितम् ॥ चारी(रु)नेत्री ॥ २९ ॥

१ यदि विधेया AB २ वइआलिअअ Com ३ रासो लसो AB ४ आभाससि B, A drops स and has आभासि ५ णिम्माअति अस्सि पुणोप मुणेहि AB ६ वैतालीयेति अत्र च सनूपुरचतुर्मात्रत्रयेताते यदि विधे रसौ लषौ AB ७ मणिरूव Com ८ The portion from मात्राणा to निरूपित is dropped in A, B adds न before मात्राणा ९ पञ्चमात्रयोद० AB १० विधय एव AB ११ दुवईगणप्रमाण AB १२ ०येत्यप्युदा AB

यथा मध्यमपादे लक्षणं चिह्न निरूपित तथाह—करहि[1] इति ।

करहिअ[2] तेरह मत्ताई (हिं)
स चउद्दह मोअणिअ
पणरहहिं चारुणेत्तिअ ।
जा सोलह अंतिमिअ
तहो णाम राहुसेणिआ ॥ ३० ॥
मात्रा मोआणिआ ।

करभ्या[3]. भवति त्रयोदश मात्रा[भि]. स चतुर्दश मोदनिकायाः[4] ।
पञ्चदश[5] चारुनेत्र्याः यस्याः षोडशान्तमिका तस्या नाम राहुसेनिका[6] ॥ ३० ॥

[स] इति मध्यमपादपरामर्शः । स मध्यमपादः करत्या(भ्या)दीना तिसृणा यथासख्येन त्रयोदशचतुर्दश[7]पञ्चदशमात्रो भवति । यस्याम(स्या अ)न्तस्थितायाः स षोडशमात्रो भवति तस्या राहुसेनेति नाम ॥ मोदनिका ॥ ३० ॥

एअव(हु) इति ।

एअहु मत्तहु अंतिमउ जव्विहि[8] दुवहउ भोदि ।
तो तहु आ(णा)में रड्डु फुडु छंदइ कइसउ[9] भोदि ॥ ३१ ॥
दुवहो मोवाणिआसंजुत्तउ रड्डा ।

एतासां मात्राणां अन्तिम(मो) यदा द्विपथको भवति
ततस्तासां नाम[10] [रड्डा स्फुटं] छन्दसि कविजनो ब्रूते ॥ ३१ ॥

एतया(स्याः) करम्यादीना मध्यादन्यतमस्या अन्ते पादपञ्चकसमाप्तौ यदा द्विपद(थ)को भवति तदा तस्या रड्डेत्येतन्नाम[11] कविजनः कथयति । अयं द्विपथोऽस्या एव मोदनिकाया अन्त उदाहरणत्वेन दर्शितः ॥ ३१ ॥

सुइसुहाव(इं) इत्यादि ।

सुई(इ)सुहाइं विणिएप्पिणु[12] इह पत्थारसाअरे
सुअणु विविहवित्ताई(इं) सुसंचिअगुणमणोहरे ।
अडिल होइ आहीरिआइ णअंगि भास(सा)इ
सजमएहिं पाए[हिं] समद्धसमेहिं कुण सआ ॥ ३२ ॥
अडिलालक्खणं अणिदिट्ठरूएण ।

---

१ वामहीति AB २ करहि सत्तरह स्रोदि मत्ताई AB ३ वाराम्या AB ४ मोदनिष्काया AB ५ पचदरचारुमैन्त्या AB ६ चकुस्सेनिका AB ७ चतुर्दशौ मात्री भवति AB ८ जड्विहि? ९ कइअणु Com १० नामैतच्छन्दासि AB ११ न्वेत्येतन्नाम AB १२ विणिएपिउणु

संदणअं रहंग संजाणह
चिंधउ हारु पट्टिसं जाणह
जमअविसुद्धएहिं संजाणह
अडिलाण(ल)क्खणंमि संजाणह ॥ ३३ ॥
अडिलालक्खणं ॥

श्रुतिसुखानि विनिरूप्येह प्रस्तारसागरे सुतनु विविधवृत्तानि सुसंचि[त]गुणमनोहरे ।
अडिला भवत्याभीर्या नताङ्गि भाषया सयमकैः पादैः समार्धसमैः कुरु सदा ॥ ३२ ॥

अडिलावृत्ति(त्त)माभीर्या भाषया भवति तच्च प्रस्तारमेव सागरं तस्मिन् श्रुतिसुखदानि मधुराणि वृत्तानि विनिश्चित्य पर्यालोच्य तन्मध्यात्समपादैरर्धसमैर्वा कुरु विधेहि । अन्यच्च किंभूतैः । सह यमकैर्वर्तन्ते ये तैः । एतदुक्तं भवति । मात्रावृत्तस्य यस्य कस्यचिच्छलितस्य आभीर्या भाषया तथा यमकेनोपलक्षितस्य अडिलेति नाम भवति ॥ ३२ ॥ ॥ ३३ ॥

वृत्तोदाहरण भाषासहितमाह—**धोरणी** इति ।

धोरणि गुमुगुमेइ भ्रमराहुं रसंतिअं
पंकअसंकुलेहिं सलिलेहि सरंतिअ ।
भमरभरोणएहिं कुसुमेहि णिरंतरु
विअसइ ताण मीसु वंसहु सरंतरु ॥ ३४ ॥
अडिला नक्कुडभेएण ।

धोरणी गुमगुमायते भ्रमराणां सरन्ती पङ्कजसंकटैः सलिलैः सरन्तृका ।
भ्रमरभरावनतैः कुसुमैः (कुमुदैः ?) सरोन्तरं विकसति तेषां मिश्रं वंशैः स्वरान्तरम् ॥ ३४ ॥

भ्रमराणां अलीनां संबन्धिनी धोरणी पङ्क्तिर्गुमगुमायते । किंभूता । सरसो जलाशयस्यान्तरं सरोन्तरं सरन्ती गच्छन्ती । किंभूतं सरोन्तरम् । पङ्कजसंकटैः सलिलैरुपलक्षितम् । किंभूता धोरणी । सरन्तृका । रमत इति रन्ता प्रियः । सह रन्त्रा वर्तते या सा सरन्तृका । अथवा । सरसः अन्तः सरोन्तः तत्र भवा सरोन्त्या सरोन्त्या एव सरोन्तिका । अन्यच्च किंभूतं सरोन्तरं वि[क]सति । कुमुदैरुपलक्षितम् । किंभूतैः । भ्रमरभरावनतैः । तत्र च सरोन्तरे तासां भ्रमरपङ्क्तीनां स्वरान्तरो ध्वनिविशेषः विकसति वंशैर्मिश्रित इव मिश्रितो मधुरत्वात् ॥ ३४ ॥

जइ ब्राह्मणि इति ।

यदि ब्राम्भणु(णि) तिण्हु चउत्थु देहि तुहु कुंजराहु सामंदु ।
भासा तो ओहिअ मारुवाई इउ गाह ढोसत्ति ॥ ३५ ॥

---

१ Com drops this stanza २ भवत्यातीत्या AB ३ श्रुतिसुधनानि AB ४ न वर्तन्ते AB ५ V 33 is not commented upon at all The commentator evidently is not aware of it ६ सरन्तिअ Com ७ कुमुणहि सरतरु Com ८ सुनोन्तर AB ९ मैनोन्तर AB १० चमनोन्तरे AB ११ मारुदाई AB

यदि ब्राह्मणि त्रयाणां चतुर्थं ददासि त्व कुञ्जराणां दा(सा)मन्तम् ।
भाषया ततो ब्रूहि मारव्येमां गाथां ढोषामिति ॥ ३५ ॥

हे ब्राह्मणि त्रयाणां कुञ्जराणामनन्तर यदि सामन्तं राजान ददासि ततस्तां गाथां मारव्या[1] भाषयोपलक्षिता[2] ढोषामिति भण ॥ ३५ ॥

अस्या[3] एव विशेषान्तरार्थं द्वितीयां गाथामाह—**अहे तिहु**[4] इति ।

अह तिहु चउत्थ ण भोदि कहवि सो कुंजराहु सामंदु[5] ।
तो देहि चउत्थओ माहा(ह)णोवि ढोसाहु णउ[6] दोसु ॥ ३६ ॥
अवब्भंसगाहाजुअलएण ढोसोहि णाम ।

अत्र(थ) त्रयाणां चतुर्थो न भवति कथमप्यसौ कुञ्जराणां सामन्तः ।
ततो देहि चतुर्थं ब्राह्मणमपि ढोषाया नैव दोषः ॥ ३६ ॥

त्रयाणा कुञ्जराणामनन्तर कथमपि कदाचिदपि यदि न सामन्तो भवति ततो ब्राह्मणमपि देहि । अस्मिन्दत्ते ढोषाणा[7] नैव दोषो भवति । कुञ्जरश्चतुर्मात्र. । एतदुक्त भवति । यदि मारव्या[8] भाषया गाथा उच्चार्यते चतुर्थे चास्या यदि मध्यगुरु सर्वलघुर्वा भवति नियमेनैव ततो ढोषाख्या लभते । मारवी च भाषा उदाहरण एव दर्शिता । मरौ भवा मारवी । मारुवेत्यन्यः पठति ॥ ३६ ॥

वित्थारिअ इति ।

वित्थारिअआणुमएण कुण
दुवईछंदोणुमएव्व मुणं[9] ।
इअ रासअ सुअणु मणोहरए
वेआरिअसत्तत्थक्खरए[10] ॥ ३७ ॥
रासअलक्खणे अणिदिट्ठवत्थुअं मत्ताम(ग)णसमम् ।

विस्तारितकानुमतेन कुरु[11] द्विपदीछन्दोनुमतेन वा पुनः ।
इति[12] रासक सुतनु मनोहरं विदारीसमाप्ताक्षरम् ॥ ३७ ॥

विस्तारितकलक्षणमुक्तम् । तदनुमतेन वा रासक कुर(रु) । अथवा द्विपदी वस्तुकेसील्यन्तरै(?)-र्विधेहि । किंभूत रासकम् । विचार्यामुक्तलक्षणाया समस्तान्यक्षराणि अभिधेयवर्णानि यस्य । एतदुक्तं भवति । येन केनचिद् द्विपदीरूपकेन द्विपद्यनुकारिणा वा गीतिकामिश्रैर्विचार्यान्तैर्वा रूपकै[13] रासको भवति ॥ ३७ ॥

अपरमपि प्रसिद्ध रासकमाह—**अडिलाहिं** इति ।

---

१ माराध्यया A, मागध्या B　२ उपलक्षितौ भोषामिति AB　३ आद्या AB　४ अत तिण्णेति AB　५ सामताटु AB　६ णउ Com A seems to read ह्लउ, B reads क्षओ　७ भोषणो A, भोषाणा B　८ माराध्यया A, मागध्या B　९ पुण Com　१० Com seems to read समत्तक्खरए.　११ वा कुरु AB.　१२ रस सुतनु० AB　१३ रूपनासको A, रूपनाकसको B

अडिलाहिं दुवहएहिं व मत्तारड्डाहि तह अ ढोसाहिं ।
वहुएहिं जो रइज्जइ सो भण्णइ रासओ णाम ॥ ३८ ॥
गाहा रासअलक्खणत्थे ।

अडिलाभिर्द्विपथकैर्वा मात्रारड्डाभिरथवा ढोसाभिः ।
वहुभिर्यो रच्यते स भण्यते रासको नाम ॥ ३८ ॥

अडिलादिभिर्वृत्तैस्त्रिप्रभृतिभिर्यो निवध्यते एकस्मिन्नेवार्थे स रासको भण्यते ॥ ३८ ॥

चलण इति ।

चलणसमे(मो)हसिअरत्तपंकअ-पसत्थथोरोरु-लडहतणुमज्झ-तुंगपीवरपओहरिल्लिए
करअललाअण्णणिज्जिआसोअमुद्धपल्लव विउद्धकंदोट्टणअण, कोमुईमिअंकवअणिए ।
ठवेसु तइअअणिउत्तथणविप्पसेसमाअंगतुरअपाइक्कजोहरहए समाणसंखए
विसमट्ठाणाविरुद्धणरणाहविअडपअमग्गघडिअसुइसुहअवण्णदीहरसमासकु(जु)त्तए ॥ ३९ ॥ सीसअं ॥

चरणेसमुपहसितप[ङ्क]ज–प्रशस्तपीनोरु–लटभतनुमध्य–तुङ्गपीवरपयोधरवति
करतललावण्यव(नि)र्जिताशोकमुग्धपल्लवे, विबुद्धकन्दोट्टनयन, कौमुदीमृगाङ्कवदने ।
स्थापय तृतीयकनियुक्तस्तनविप्रशेषमातंगतुरंगपदातियोधरथान् समानसंख्यान्
विषमस्थानाविरुद्धनरनाथविकटपदमार्गघटितश्रुतिसुभगवर्णदीर्घतरसमासयुक्त(क्तान्) ॥ ३९ ॥

वस्तु । एतस्यैवार्थावलम्बिनी गीतिका विरम इति ।

विरमणिरूविअवाणए अवलंविअगीइअअत्थसी[से]सएसुं ।
चउसु वि सण्ण[अ]वाहिए इह मालासीसअस्स पाअएसुं ॥ ४० ॥
मालासीसअलक्खणत्थे गीइआ ॥

विरामनिरूपितबाणान् अवलम्बितगीतिकार्थशेषेषु ।
चतुर्ष्वपि संनतबाहो इह मालाशीर्षकस्य पादेषु ॥ ४० ॥

संनतौ बाहू यस्यास्तस्या आमन्त्रणम् । एवंविधान् गणान् चतुर्ष्वपि पादेषु मालाशीर्षकस्य स्थापय । वस्तुपरिपूरणार्थमामन्त्रणपदानि पादद्वय(ये) । विशेषणविशेष्यभावेन समासाः । चरणाभ्या समुपहसितमवधीरित रक्तपङ्कज यया । तथा प्रशस्तौ थोरौ पीनावूरू यस्याः । लटभ रमणीयं तनु च मध्य यस्या । तथा तुङ्गावुन्नतौ पीवरौ घनौ स्तनौ यस्याः सा एवभूता । इत्येकपद

---

१ नामको AB २ चरणे समुपहित AB ३ ल्वाहतमध्य AB ४ शेष repeated after तुरग AB ५ पदातिपयोधररथान् AB ६ विरुद्धाननाथ AB ७ विनामेति AB ८ वारणए AB ९ चतुर्थापि सतुबाहो AB १० सनतौ AB ११ पीनौ AB

पादश्च । तथा करतललावण्यव(नि)र्जितान्यशोकवृक्षस्य मुग्धान्यभिजातानि पल्लवानि किसलयानि यया । तथा विबुद्धस्य कन्दोट्टस्य विकसितोत्पलस्य सदृशे नयने यस्याः । तथा कौमुद्या कार्तिकपौर्णि(र्ण)मास्यां योऽसौ मृगाङ्कः चन्द्रमाः [तेन] सदृश वदनं यस्या सा तथाभूता इति द्वितीय' पादः । हे एवंभूतगुणयुक्ते मातंगादीन् स्थापय । किंभूतान् । तृतीयो नियुक्तः स्तनो विप्रो वा येषाम् । शेषांश्च मातग[तुरग]पदातियोर्धरथान् सामान्येन चतुर्मात्रगणान् समानसङ्ख्यान् तुल्यगणनान् स्थापय इच्छया षोढा दशधा द्वादशधा लक्ष्यानुसारेणेति । तथा विषमस्थाने वाविरुद्धो नरनाथो येषां तथा विकटैर्विस्तीर्णैः पादमार्गैः पादगतिभिर्दीर्घतराणि रचितानि यानि श्रुतिसुखानि मधुराणि वर्णानि वाचकानि तैर्ये दीर्घतराः समासाः तद्युक्तम् । अन्यच्च । विरामेन्ते निरूपितो बाणो येषां तानेवंभूतान्गणान् स्थापय चतुर्ष्वपि पादेषु । किंभूतेषु । अवलम्बितोऽधिकृतो गीतिकायामर्थस्याभिधेयस्य शेषो येषाम् ॥ ४० ॥

कइणो चिंततस्स इति ।

कइणो चिंततअस्स अहिअक्खरत्थसेसँअं
णीलुप्पलविअसिअच्छि गीइआ(अ)इ जइ समत्तअं ।
तो जाणसु सण्णअंगि दूरमहुरक्खरिल्लं[अं]
सत्थत्थविअक्खणाण पुरिसाण सुइसुहावअं(हं) ॥ ४१ ॥

कवेश्चिन्तयतोऽधिकाक्षरार्थशेष नीलोत्पलविकसिताक्षि यदि गीतिकासमाप्तम् ।
ततो जानीहि संनताङ्गि दूरमधुराक्षर शास्त्रार्थविचक्षणानां पुरुषाणां श्रुतिसुखावहम् ॥ ४१ ॥

इत्यधिकाक्षरा । अनन्तरमस्यैवार्थे गीतिकामाह—**माणिणि** इति ।

माणिणि दाविज्जंतुअं तुह दंसणसुहरसाविअण्हएण ।
विरहंकएण मुद्धिए अहि[अ]क्खरसीसअंति बीअअंसि(पि) ॥ ४२ ॥

अहिअक्खरसीसअ [अधिकाक्षराशीर्षक] ।

मानिनि प्रदर्श्यमानं तव दर्शनसुखरसावितृष्णेन ।
विरहाङ्केन मुग्धेऽधिकाक्षरशीर्षकमिति द्वितीयम् ॥ ४२ ॥

हे मानिनि द्वितीयमधिकाक्षराशीर्षकं तवं विरहाङ्केन दर्श्यमान अधिकाक्षर अर्थशेषो यस्य तथा गीतिकाया समाप्तम् । शेषमुदाहरणपरिपूरणम् । शास्त्रार्थविचक्षणा ये पुरुषा' [तेषा] श्रुतिसुखावहम् । विरहाङ्क इति आचार्यस्य नाम । किंभूतेन विरहाङ्केन तवं दर्शनाद्यत्सुख तदेव रस इव रस. तस्मिन्नवितृष्णेन । अन्येषा मते अधिकाक्षरैव [स]गीतिर्का अधिकाक्षराशीर्षकम् ॥ ४२ ॥

---

१ पयोधररथा B, पयोधरधा A　२ स्तुति० A, स्तुति० B　३ तैर्यैते AB　४ तेनेव AB　५ विवृतो AB　६ गीतिकासामर्थ्यस्याभि० AB　७ सीसअ AB　८ रिल्ल A, रिल्ल B　९ विकसिताक्षिनूपुरमधु० AB　१० शीर्षकोन्तय AB　११ शास्त्रान्तरविचक्षणा AB　१२ तदेव दर्शनाद्यतन्मुख AB　१३ मता AB　१४ गीतिकाक्षराशीर्षक AB

निर्वापिताशीर्षकार्थमाह—**अहिअक्खर** इति ।

अहिअक्खरसीसअस्स अवि(व)लंविअत्थपंअडिआ[1]
विणिउज्जइ सण्णअंगि मज्झे जइ णिव्वा(व्वा)इया ।
तो जाणसु तिअलअंति वहुछंदओत्तभणिअअं
वी(वि)यअं[2] व पुणो मुणो(णे)सु छउओअरि सीसअं तं ॥ ४२ ॥

तिअलअमालासीसअं [त्रिकल्क, मालाशीर्षक] ।

अधिकाक्षराशीर्षकस्या[व]लम्बितार्थंचेतिता विनियुज्यते[3] संनतांङ्गि मध्ये यदि [नि]र्वापिता ।
ततो जानीहि त्रिकलकमिव(ति) वहुच्छन्दोविद्भणित द्वितीयं शीर्षकमिति नाम जानीहि मुग्धे ॥ ४२ ॥

इत्यधिकाक्षरा । अस्यैवार्थे निर्वापितामाह[4]—

अहि[अ]क्खरसीसअस्स जं मए
तुह कहिअं लक्खणं पिअल्लिए ।
भणिअं तं[5] च इमस्मि तिअलअए
ससहर[6]वयणे कवीहिं छंदए ॥ ४४ ॥

अणिदिट्ठसमरूवि(व)अं [अनिर्दिष्टसमरूपक] ।

अधिकाक्षरशीर्षकस्य यन्मया तव कथित लक्षणं प्रियतमे ।
भणित तदेवास्मिंस्त्रिकलके शगि(श)धरवच(द)ने कविभिश्छन्दसि ॥ ४४ ॥

हे चन्द्रमुखि तँत् त्रिकलकस्य लक्षणमिति जानीहि[7] । यद्यधिकाक्षराशीर्षकस्य य एवार्थस्तस्मिन्नेत्र निर्वापिता विरचनीयेत्यर्थ' । वहुच्छन्दोविद्भिर्भणितमिनि त्रिकलकविशेपणम् । किंच । द्वितीयमप्यस्य नाम मुणेसु जानीहि शीर्षकमिति । अस्यैव त्रिकलकमिति निर्वापिताशीर्षकमिति च नामद्वयमित्यर्थः । निर्वापिता-उदाहरणपतितो योऽर्थो व्याख्यायते । अधिकाक्षराशीर्षकस्येति । एतदुक्त भवति । यदेवाधिकाक्षराशीर्षिकस्य तव मया भणितं [लक्षण] तदेवास्मिन् त्रिकलके कविभिर्निरूपितमिति कइणो चिंतंतस्सेत्यादिना[8] ॥ ४४ ॥

अस्यानन्तरमुदाहरणपूरणार्थं गीतिकामाह—**मालासीसअ** इति ।

[[9]मालासीसअणामए इच्छासमसंखअंसणिअमएण ।
जं लक्खणं पिअल्लिए तं चिअ कहिअं इमस्मि तिअलएवि ॥ ४५ ॥]

मालाशीर्षकनाम्नीच्छासमसंख्यांशनियमेन ।
यल्लक्षण प्रियतमे तदेव कथितमस्मिन् त्रिकलके ॥ ४५ ॥

---

१ पायट्यिआअट्यिआ AB, चेइआ Com २ Com seems to read वीअ वि सीसअअति णाम मुणेसु मुद्धिए. ३ विविधनत्रनापि AB ४ निर्वाहितमाह AB ५ त च्चिअ इमम्मि तिअलए Com This is metrically correct. ६ ससिवयणे AB (against metre) ७ ततस्त्रिकलसिधरवचनमिति जानीहि AB ८ निर्वारणा AB
९ This stanza is reconstructed from the commentary It is not found in the text.

इच्छा(च्छ)या समसंख्यांशाति(दि?)नियमेनावश्यतया यदेव लक्षणं मालाशीर्षकनाम्न्युक्तं तदेवास्मिंस्त्रिकलके भणितम्। एतच्छिष्याणां विस्पष्टार्थं पुनर्लक्षणमुक्तम्। एव चतुर्भी रूपकैस्त्रिकलको भणितः ॥ ४५ ॥

सललिअ इति।

सललिअगमणे पिए पुण्णअंदाणणे दीहराअंग-
पल्हत्थणीलुप्पले[1] णाअसत्थत्थसंभाविए
कणअकलससण्णिहोत्तुंगपीणुत्थणोक्कंपवोसट्ट-
लाअण्णसोहास(सु)सोहाविआणा(णे)असिद्धंगणे।
रसरवफु(फ)रिसेसु दिण्णेसु दे दुण्णि गंधे पुणो पाअडं
पक्खिणाहं समाणाइ[2] संखाइ[2] बिंबोट्ठिए
चउसुवि इह डंडए चारु पाएसु इच्छाइ दूरुज्ज-
णेववलन्तेसु (?) थोरोरुसोहासुसोहाविए ॥ ४६ ॥

दंडओ [दण्डकः]।

सललितगमने प्रिये पूर्णचन्द्रानने दीर्घतरापाङ्गपर्यस्तनेत्रोत्पले ज्ञातशास्त्रार्थसद्भावे
कनककलशसंनिभोत्तुङ्गपीनस्तनोत्कम्पविकसल्लावण्यशोभासुशोभिता[नेकसिद्धाङ्गने।
रसरवस्पर्शेषु दत्तेषु देहि द्वे गन्धे पुनः प्रकटं पक्षिनाथं समानया संख्यया बिम्बोष्ठि
चतुर्ष्वपि इह पादेषु दण्डके चारु पादेषु इच्छया दूरं स्थविरोरुशोभासुशोभिते ॥ ४६ ॥]

हे एवभूते प्रिये दण्डकस्य पादेषु[3] चतुर्ष्वपि रसरवस्पर्शेषु दत्तेषु[4] सत्सु द्वे गन्धे देहि लघुषट्क[5]-मित्यर्थः। पुनः पश्चात्पक्षिनाथ मध्यलघु प्रकट स्पष्टं समानया[6] संख्यया देहि। अत्रेच्छया समानत्वं पादापेक्षया। तेनैतदुक्त भवति। यावद्भिर्गणैः पादः प्रथमो भवति तावद्भिरेवास्य पादत्रयमिति। यस्मादन्यैराचार्यै. सततनवैकादशभिरपि[7] दण्डकः कथित एव। दीर्घतरयोरपाङ्गयोः पर्यस्ते प्रसृते नीलोत्पले यस्याः। तथा ज्ञातः शास्त्रार्थाना सद्भावः परमार्थो यया सा। तथा कनककलशसंनिभौ हेमकुम्भसदृशौ यावुत्तुङ्गौ उन्नतौ पीनौ च स्तनौ तद्दुर्लकम्पेन[8] विकसित यत्तव लावण्य तच्छोभया सुष्ठु शोभिताः अनेकाः सिद्धाङ्गना. देवललना यया। निव्वनन्त निष्पाद्यमानम्। वोसट्ट[9] विकसितम्। थोर परिवर्तुलम्। एनान्यामन्त्रणानि ॥ ४६ ॥

कुरमेत्त इति।

कुरम(मे)त्तआ।

कुण्णअसत्तअव्व खंडुग्गआइ विसमा
हुअंति सव्वे दीहधवलच्छि विरसंट्ठाणु[10]ज्जलदिण्णतिमत्तआ।

---

१ णीलुप्पलो णामअत्थत्थ० AB २ सवाणई सखाई AB ३ पादेष्वपि AB ४ वनेषु B, A drops the word. ५ लघुपर्कमित्यर्थ AB ६ समया AB ७ मततनकादश AB ८ तदुत्कपया AB ९ सोवट्ट AB १० विम्मम० AB

अणरिंदआ ।

विलसट्ठाणे(ण)एसु पाआ समावि कअबीअतईअ-
सरसेससणिअमसजमअसमसंखतुरअगआ सणरिंदआ ॥ ४७ ॥

खड्डुग्गआ [खण्डोद्गता] ।

[करमात्रौ]। कर्णमात्रौ च खण्डोद्गतायाः विषमौ भवत. सर्वे[2] दी[2]र्घध्वलाक्षि विरमस्थानोज्ज्वलदत्तत्रिमात्राः । अनरेन्द्रौ । विषमस्थानेषु[3] पादौ समावपि[3] कृतद्वितीयतृतीयशरशेषे[4]सनियमसयमकसमसंख्य[4]तुरगगजौ सनरेन्द्रौ ॥

खण्डोद्गताया विपमपादौ कर्णमात्रौ करमात्रौ वा भवतः। गुरुद्वयेनान्तगुरुणा वेत्यर्थः। हे दीर्घधवलाक्षि सर्वे चास्या. पादा' समा विपमाश्च विरा[5]मस्थाने दत्तोज्ज्वलत्रिमात्राः सर्वपादानामन्ते त्रिमात्रोन्तगुरु कर्तव्य इति। समौ च पादावेवभूतौ विधेयौ—कृतौ द्वितीयतृतीयौ [शरौ] पञ्चमात्रौ नियमेन सयमकौ तथा समसख्यास्तुर[ग]गजा ययोस्तौ कृतद्वितीयतृतीयशर[6]सनियमसयमकसम-सख्यतुरगगजौ। अन्यच्च। सनरेन्द्रौ सामान्यसज्ञायामितरत्र मध्यगुरुर्गृ(ग्र)हीतव्य इत्यर्थ'। किंतु अनरेन्द्रावेतौ विपमस्थानेपु विधेयौ ॥ ४७ ॥

वइआलिअ इति ।

वइआलिअं दुमत्तआ
तिण्णि विहंगँवई धअग्गअं ।
समपाअमुहेसु वड्ढिआ
होइ रसेण व णेउरेण वा ॥ ४८ ॥ [वैतालीय] ।

वैतालीयं द्विमात्रास्त्रयो विहगमपति. ध्वजाग्रम् ।
समपादमुखेपु वर्ति(र्धि)त भवति रसेन वा नूपुरेण वा ॥ ४८ ॥

प्रथम सामान्येन द्विमात्रास्त्रयो गणा विहगमपतिरनन्तरमन्ते च ध्वजाग्रं यस्य तदेवमूत वैतालीयम्। किंच। समपादयोर्मुखे[8] रसेन वा नूपुरेण वा वर्धितमिद मात्राद्वयेनेत्यर्थ'। द्वे मात्रे पृथक् पृथक् लघुरूपेण वात्र ॥ ४८ ॥

वइआलिअ[अ]स्स इति ।

वइआलिअअस्स पाअअस्मि
एक्को वड्ढइ चारुभूसणेणं
तं साहइ दु(तु)ज्झ दीहरच्छि
उअच्छंदसए लक्खणं विरामे ॥ ४९ ॥ [औपच्छन्दसक] ।

वैताली[य]स्य पादे एक वर्धते चार्य(रु)भूपणस्य ।
तत्साध्यते दीर्घतरा[10]क्षि औपच्छन्दसके लक्षण विरामे ॥ ४९ ॥

---

१ वर्णोद्गताया AB २ सर्वदीर्घधवलाक्षि AB ३ विपमस्थानौ पादौ समावपि कृत० AB ४ शेषनियमशसनियमसंख्य AB ५ विरामस्थाने AB ६ श नियममसयमकसमसंख्य० AB ७ विहगमाः AB ८ युगेपु AB ९ दु खे AB १० दीर्घतरलाक्षि AB

वैतालीयस्य यः पादस्तस्मिन् विरामे यद्येकं भूषणं वर्धते तदास्यौपच्छन्दसकमिति नाम भवति तत्र साध्यते कथ्यते ॥ ४९ ॥

आवाअलि इति ।

आवाअलिअम्मि दुमत्ता
तिण्णि पुणो चलणा मणिहारा ।
समपाअमुहेसु निहित्ता
तस्स मणिव्व रसोव्व इसीहिं ॥ ५० ॥ [आपातलिका] ।

आपातलिकायां द्विमात्रास्त्रयः पुनश्चरणे(णो) मणिहारौ ।
समपादमुखेषु विनियुक्तः [तस्य] मणिर्वा रसो वर्षिभि. ॥ ५० ॥

आपातलिकानाम्नि वृत्ते द्विमात्रगणत्रयैस्यान्ते चरणेमणिहारा विरचनीयाः । आदिगुरुर्गुरुद्वयं चेत्यर्थः । ऋषिभिः सैनवादिभिर्मणिर्वा लघुद्वयं वा समपादमुखे युक्तम् ॥ ५० ॥

एतेषा विशेषलक्षणार्थं गाथामाह—**व[इ]आलिअ** इति ।

वइआलिअउअच्छंदसआवा[अ]लिआण मा कुण समेसु ।
पाएसु तिण्णि घडगाट्ठिए रसे दीहधवलच्छि ॥ ५१ ॥
मा(गा)हा वैआलिअउवच्छंदसआवायलिआण समा(म)पाअविसेसलक्खणत्थे ।

वैतालीयौपच्छन्दसकापातलिकानां मा कार्षी. समेषु ।
पादेषु त्री[न्] घटनास्थितान् रसान् दीर्घधवलाक्षि ॥ ५१ ॥

एतेषा वृत्ताना द्वितीयचतुर्थपादयोः सघातस्थितास्त्रयो रसा न विधेयाः । गुरुव्यवहिता कार्याः षट् लघव इत्यर्थः ॥ ५१ ॥

पँढमणिउत्त इति ।

पढमणिउत्तहत्थिवीआसितइज्जरहंगतुरअएहिं
समसंखाइ सेसपाइक्कजोहसंदणगअंदएहिं ।
कीरड उग्गआइ सव्वाअरेण विरमाट्ठिअजमएहिं
समणिलआविरुद्धवसुहाहिवेहि द(च)हुहिंपि पाअएहिं ॥ ५२ ॥

उग्गआ [उद्गता] ।

प्रथमानु(नि)युक्तहस्तिद्वितीयासितृती]यरथाङ्गतुरगै. समसंख्यया शेषपदातियोधस्यन्दनगजेन्द्रैः ।
क्रियते उद्गतायां. सर्वादरेण विरामस्थिति(त)यमकैः समैनिलयाविरुद्धवसुधाधिपैश्चतुर्भिरपि पादैः ॥ ५२ ॥

उद्गता एवंविधै. पादैः क्रियते । प्रथमे नियुक्त हस्ती द्वितीयश्चासिस्तृतीयश्च रथाङ्गं तुरंगश्च समसंख्यया शेषाश्च पदातिप्रभृतय सामान्येन चतुर्मात्रा येषा समनिलये समस्थाने अविरुद्धो

---

१ आवालिअ AB २ विणियुक्तर्म्मणिर्वा AB ३ द्वयस्यान्ते AB ४ रचण AB ५ मा कुण सैरसमेतुं AB ६ स्थित रसादीधवलाक्षि AB ७ पढममणिउत्तेति AB ८ उद्गता च AB ९ समल्कियाविसुद्ध AB १० रथाङ्गन्तुरङ्गे वा AB ११ चतुर्था AB १२ समनितये AB १३ समस्थानविरुद्धो A, ०विरुद्धा B

वसुधाधिप[श्च] येषा तैरिति ॥ ५२ ॥

दे कोट्टुम्बअस्स इति ।

दे कुट्टुंभअस्स पढमं चलणं अहवा अ कण्णअं
भामिणि वीअअं च विहआहिवइं तइअं रहंगअं ।
पाणिजुअं पुणोवि सपओहरअं महुरक्खरिल्लए
कोमलवंधअम्मि विरमुज्जलए रअणं च पाअए ॥५३॥ [कुट्टुम्भक] ।

देहि कोट्टुम्बकस्य प्रथम चरणमथवा कर्णं भामिनि द्वितीय च विहगाधिपतिं तृतीयं रथाङ्गम् ।
पाणियुग पुनरपि सपयोधरं मधुराक्षरे कोमलवन्धे रत्नोज्ज्वले विरामे पादे ॥ ५३ ॥

कोट्टुम्बकस्य पादे प्रथममादिगुरु द्विगुण(रु) वा देहि तृ(द्वि)तीय च विहगाधिपं गरुड तृतीय च रथाङ्ग चक्रं च । अनन्तर पाणियुगम् । किंभूतम् । सहपयोधरेण मध्यगुरुणा वर्तमानम् । किंभूते पादे । रत्नेनोज्ज्वले । विराम इति विषयनिर्देश ॥ ५२ ॥

रसणेउरभावमणीण पिए
पुरओ करपल्लवआण जुअं ।
कसणोप्पलसण्णिहलोअणिए
कुण छित्तअपाअ मणोहरए ॥ ५४ ॥ [छित्तकं] ।

रस इति ।

रसनूपुरभावमणीनां प्रिय(ये) पुरत. करपल्लवयो युगम् ।
कृष्णोत्पलसंनिभलोचने कुरु छित्तकं सुमनोहरे ॥ ५४ ॥

रसस्य द्विलघोर्नूपुरस्य गुरोश्च भावस्य लघुद्वयस्यैव च तथा मणेः पुरतोऽग्रे करपल्लवयोर्युग च्छित्तकनाम्नि वृत्ते विधेहि ॥ ५४ ॥

चामर इति ।

चामरभावकु(जु)अम्मि विइण्णे
देसु सणेउररूअजुअं च ।
हारलअं कडअं च विरामे
दूरसमुज्जलभित्ति(त्त)अपाए ॥ ५५ ॥ [भित्तकं] ।

चामरभावयुगे वितीर्णे देहि सनूपुररूपयुग च ।
हारलता कटक च विरामे दूरसमुज्ज्वलभित्तकपादे ॥ ५५ ॥

---

१ रअणुज्जलए विरमम्मि Com. २ च चरण० AB ३ पाणियुग repeated immediately in A ४ कमलोप्पल AB ५ छित्तअए सुमणो० Com ६ मनीनो A, मानिनो B ७ श्चितके AB ८ रम्य AB ९ वृत्त AB A adds कुरु १० सनूपुरत्रययुग AB ११ छित्तक AB

चामरश्च भावश्च चामरभावौ तयोर्युगे द्वितये विती[1]र्णे दत्ते पश्चात् सनूपुरं रूपयुगं च देहि[2]। विरामे हारलता कटकं च। दूरसमुज्ज्वलेऽत्यर्थं मनोहरे। भित्तके चरणत्रयं क[3]र्णश्चेत्यर्थः ॥ ५५ ॥

विरा(र)म इति।

विरमट्ठाणएसु पसअच्छि कण्णएहिं विइण्णएहिं
समणिलआविरुद्धणिअस्मिअमणोह[4]रेहिं पओहरेहिं।
तइअट्ठाणबीअणिलए सरासणेहिं [कआसणेहिं]
अइ सामुग्गआइ सेसे पिए गएहिं विलग्गएहिं ॥ ५६ ॥

सामुग्गआ [सामुद्गका]।

विरामस्थाने प्रसृता[5]क्षि कर्णैर्वितीर्णैः समनिलयाविरुद्धनियमितपयोधरैर्मनोहरैः।
तृतीय[6]स्थाने द्वितीयनिलये शरासनैः कृतासनैः [अयि] सामुद्गकायाः शेषे प्रिये[7] गजैर्विलग्नैः ॥ ५६ ॥

सामुद्गकायाः पादाः इति भवन्तीति। विरामस्थाने क[8]र्णैरुपलक्षिताः। तथा समनिलयैरविरुद्धा नियमिता ये ते पयोधरास्तैश्च मनोहरैरुपलक्षिताः। अन्यच्च। तृतीयस्थानक द्वितीयनिलय च, तस्मिन् शरासनाभ्यां धनुर्भ्यां उपलक्षिता ये च। शेषे च परिशिष्टैर्गजैर्विलग्नैः श्लिष्टैः उपलक्षिता ये च ये। विरामस्थाने(न) द्वितीयतृतीये च मुक्त्वान्येपा चतुर्मात्रा विधेया इत्यर्थ. ॥ ५६ ॥

पक्खिणाह इति।

पक्खिणाहअ[ह]त्थाणं
सं(अं)तअम्मि दु[ए] हारा।
दे इमस्स सआ पाए
हंसगामिणि गाहस्स ॥ ५७ ॥ [गाथः]।

पक्षिनाथहस्तयोरन्ते द्वौ हारौ।
देह्येत[9]स्य सदा पादे हसगामिनि गाथस्य ॥ ५७ ॥

एतस्य गाथस्य पादे पक्षिनाथस्य मध्यलघोर्हस्तस्य चान्तगुरोरन्ते गुरुद्वयं देहि ॥ ५७ ॥

णा[10]राअस्स इति।

णाराअस्स विरुज्झइ णअंगि णिअअम्मि लक्खणे णामं।
जेण अ(स)आ तेण मए णिअरिसणं केवलं भणिअं ॥ ५८ ॥

गाहा णाराअणामत्थे।

नाराचस्य विरुध्यते नताङ्गि निजके ल[11]क्षणे नाम
येन सदा तेन मया निदर्शन केवलं भणितम् ॥ ५८ ॥

---

१ द्वितोये विस्तीर्णे AB २ सनूपुरे रूपयुगे लघुर्देहि AB ३ कर्ण dropped in A ४ पओहरेहिं मणोहरेहिं Com
५ प्रसत्यद्विद्वि AB ६ द्वितीयस्थाने तृतीयनिलये AB ७ प्रियै AB ८ कर्भैरुप० A कभिरुप० B
९ तेह्यन्तस्य AB १० माभस्सेति AB ११ लक्ष्मणा AB

यस्मिन् लक्षणवाक्ये नाराचमुक्त तस्मिन् तस्य नाम विरुध्यते । उदाहरणव्याघातात् । येन कारणेन तेन तस्मान्नाम्नो निदर्शनं उदाहरण केवल पृथग्भणितम् ॥ ५८ ॥

आह च—**ससद्द** इति ।

ससद्दणेउरं धअं
सरूवकुंडलं रवं ।
ठवेसु तस्स पाअए
विरामए सहारअं ॥ ५९ ॥ नाराअअ [नाराचक] ।

सशब्दनूपुरं ध्वजं सरूपकुण्डल रवम्[१] ।
स्थापय तस्य प(पा)दे विरामे सहारम् ॥ ५९ ॥

तस्य नाराचस्य प्रथम सशब्द नूपुरं स्थापय पश्चात् ध्वजमनन्तर सरूप च कुण्डल रथ(व) सहार च ततः । ध्वजपटाश्चचार इत्यर्थ[२] ॥ ५९ ॥

गअरह इति ।

गअरहतुरंगसंदणणिउत्तजोहेहिं
रणे[३]अविरुद्धणराहिवविलग्गसोहेहिं ।
छट्ठणिरुविअमरगअविरामजमएहिं
ललिअं ठवेसु सुंदरिए सम[४]पाअएहिं ॥ ६० ॥ [ललिता] ।

गजरथतुरगस्यन्दननियुक्तो(क्त)योधै रणे नविरुद्धनराधिपविलग्नशोभै ।
षष्ठनिरूपितमरक्तविरामयमकैर्ललितां स्थापय सुन्दरिके समपादै ॥ ६० ॥

गजादिभि सह नियुक्तो योधो येषा ते । तया पञ्चभिश्चतुर्मात्रै[५] पाद कार्य । रणे समेऽविरुद्धे च नराधिपे विलग्ना शोभा येषां षष्ठे च निरूपित मरकत [तै] विरामयमकै ललिता स्थापय ॥ ६० ॥

रस इति ।

रसणेउरभावसणीण जुअस्स जुअं
णिअमेण णिउंजसु रूअजुअं समणिं ।
भमरावलिआइ सुदूरमणोहरए
ललिअक्खरपंतिपसाहणसोहिअए ॥ ६१ ॥ [भ्रमरावलिः] ।

रसनूपुरभावमणीनां युगस्य युगे(गं) नियमेन नियुङ्क्ष्व रूपयुग समणिम्[६] ।
भ्रमरावल्या सुदूरमनोहरं ललिताक्षरपङ्क्तिप्रसाधनशोभितम्[७] ॥ ६१ ॥

---

१ नानावयुम्न AB २ ध्वजारथ AB ३ थाणविन्द्ध AB ४ ससमपाअएहिं AB ५ रविलग्ना च येषा AB
६ सुमनि B, समनि A ७ पद्मीप्रसा० AB

रसश्च [नूपुर च] भावश्च मणिश्च ते रसनूपुरभावमणय' तेषां यद्युग द्विरावृत्तिः अस्मिन् स्थिते सति नियमेन रूपयुगं मणिसहितं नियुङ्क्ष्व पञ्च करा इत्यर्थः ॥ ६१ ॥

तुरअ इति ।

तुरअरहंगवाणए चलणं च सआ
ताण पुरिल्लिअं कुण णेउरं छउए ।
सहिअअमणसुहावए महुरक्खरए
कुमुअअपाअए मुद्धिए सोहणए ॥ ६२ ॥ [कुमुदकं] ।

तुरगरथाङ्गबाणान् चरण च सदा तेषां पौरस्त्य कुरु नूपुरं छाते ।
सहृदय[म]नःसुखावह(हे) मधुराक्षर(रे) कुसुदकपादे मुंग्धे शोभंने ॥ ६२ ॥

तुरगमश्च रथाङ्ग(ङ्गं) च बाणश्च तान्प्रथमं कुरु । पश्चाच्चरणमादिगुरुं कुरु । तेषां पौरस्त्यं पुरोवर्ति । छाते तन्वि । स्पष्टमन्यत् ॥ ६२ ॥

तिण्णि इति ।

तिण्णि रहाइं ठवेप्पिणु बे गअ णिहणइं कण्णु ।
ए उप्फुल्लअलक्खण पच्छद्धेवि ण अण्णु ॥ ६३ ॥ [उत्फुल्लकं] ।

त्रीन् रथान् स्थापयित्वा द्वौ गजौ निधने कर्णम् ।
इत्युत्फुल्लके लंक्षणं पश्चार्धेऽपि नान्यत् ॥ ६३ ॥

रथत्रयं स्थापयित्वा पश्चा[त् गजद्वयं कर्णं च स्था]पयेति शेषः । एतदुत्फुल्लके पश्चार्धेऽपि लक्षणम् । अत्रापि द्विपथकवद्यतिविधानम् ॥ ६३ ॥

[**चामर** इति ।]

चामरभावजुअं हाराण जुअं च पिए
दीसइ मुत्तिअआ रूवाण जुअं च सआ ।
हारविहूसिअअं सद्दाण जुअं छउए
अ(अं)ति णिओइअअं पाए जइ णेउरअ(आ) ॥ ६४ ॥
मत्तागणवण्णसमं असक्कीरी (अस्सक्कंता ?) ॥

चामरभावयुगे(ग) हारयोर्युग च प्रिये दृश्यते मौक्तिंक रूंपयोर्युग संदा ।
हारविभूषित शब्दयोर्युग छाते अन्ते निंयोजित पादे यदि नूपुरंम् ॥ ६४ ॥

अस्यैवार्थं च गाथामाह—**गाहा** इति ।

---

१ मुग्धे कुरु शोभने AB. २ विलक्षण A, चिलक्षण B ३ Between मौक्तिक and रूपयो, both A and B add रूपप्रसाधनशोभित रस. ४ दस AB. ५ वियोजिते AB. ६ नपरं B, नपुर A.

गाहा तह अ विरामे दीसइ पसअच्छि तो विआणेज्ज ।
अं(सं)गअअं णाम इमं मत्ताविताण मज्झम्मि ॥ ६५ ॥
गाहा अणंतरवत्थुअसहिआ संगअं ॥ [सगतकं] ।

गाथा तथैव विरामे दृश्य[ति] प्रसृताक्षि ततो विजानीहि ।
संगतकं नामैतत् मात्रावृत्तानां मध्ये ॥ ६५ ॥

चामरश्च ता(भा)वश्च तयोः प्रथम युगम् । पश्चात् हारयो रवि(पि) युगं यदि दृश्यते मौक्तिक चानन्तरं पश्चाच्छंद्युग छाते तन्वि पादचतुष्टयविरामे गाथा दृश्यते यदि च ततः संगताख्य-मेतन्मात्रावृत्तानां मध्ये वृत्तं जानीहि[3] ॥ ६५ ॥

विसम इति ।

विसमम्मि पिए तिण्णि गआ
चामरअं च विरामए ट्ठिअं ।
दि(दो) तुरआ चावं च समे
विंदुतिलए धअं च पाअए ॥ ६६ ॥ [विन्दुतिलक] ।

विषमे प्रिये त्रयो रा(ग)जाः चामर च विरामे स्थितम् ।
द्वौ तुरगौ चापश्च समे विन्दुतिलके ध्वजश्च पादे ॥ ६६ ॥

विन्दुतिलकश्च(स्य) विपमपादे चतुर्मात्रास्त्रयो गुरो(रु)श्चेति भवति । समे तु द्वौ चतुर्मात्रौ पश्चात्पञ्चमात्रस्ततो ध्वज इति भवति ॥ ६६ ॥

पढम इति ।

पढमं द[इ]ए होइ तुरंग अंसे
बीअं च गअं तइअं सदणं च ।
विहआहिवई चामरअं च पाए
वी[थि]त्ति ई(इ)मं जाणसु च्छंदअम्मि ॥ ६७ ॥ [वीथी] ।

प्रथम दयिते भवति तुरग. एतस्य द्वितीयश्च गजस्तृतीयः स्यन्दनश्च ।
विहगाधिपतिर्विषधरश्च पादे वीथीत्येतज्जानीहि छन्दसि ॥ ६७ ॥

एतद् वीथ्याख्य वृत्तं जानीहि यस्य चतुर्मात्रच(त्र)यस्यान्ते मध्यलघुश्चतुर्थगुरुर्वा भवति गुरुश्च ॥ ६७ ॥

दीसइ इति ।

---

१ प्रसृताक्षि B, प्रवृत्याक्षि A. २ छद्युग AB ३ Both A & B add वस्तुकोदाहरण ४ अस्स Com ५ Does the Com read विहआहिव विसहर व गरुअ अ पाए? ६ The translation should be चामर च for विषधरश्च The alternative Gana विषधर IIIS seems to be suggested by the Commentator and the words विषधरश्च here (in the place of चामर च) and चतुर्थलघु(गुरु)र्वा in the explanation appear to be added by him by way of gloss ७ मध्यगुरुश्चतुर्थलघुर्वा AB

दीसइ पाअए
जत्थ[1] गअंदअं ।
अंतसुवण्णअं
तं ओलंबअं ॥ ६८ ॥ [अवलम्बकं] ।

दृश्यते पादे यस्य गजेन्द्रः ।
अन्ते सुपर्णस्तदवलम्बकम् ॥ ६८ ॥

गजेन्द्रः सामान्येन चतुर्मात्रः । सुपर्णो मध्यलघुः ॥ ६८ ॥

पक्खिणाहा इति ।

पक्खिणाहा दुवे कण्णं
पडहरसरवकरं ।
चाव विहवाहिवं
दोसु अ चउप्पअं ॥ ६९ ॥ [चतुष्पदं] ।

पक्षिनाथौ द्वौ कर्णः पटहरसरवकरम्[2] ।
चापविहगाधिपती द्वयोश्च [चतुष्पदम्] ॥ ६९ ॥

[च]तुष्पदं नाम वृत्त यस्य प्रथमपादे पक्षिनाथौ द्वौ कर्णश्च भवति । द्वितीय(ये) पटहश्च रवश्च रसश्च करश्च तत् पटहरसरवकरम् । पटहस्त्रिलघुर्गणः । अनन्तरं तृतीय(ये) चतुर्थे च पृथक् चापो[3] विहगाधिपतिश्चेति ॥ ६९ ॥

ईयं[4] केवलं चतुष्पदा । युक्तचतुष्पथा(दा)या गाथा(थ)या लक्षणमाह—**अवलंबक** इति ।

ओलंबअएक्कअं(अ)जोइआ जुआ सा चउप्पआ च्छंद ।
साहेमि[5] एक्कअं णाम वज्जिअं लक्खणे णामं ॥ ७० ॥
गाहा बीअचउप्पअत्थे बाणंतुग्घयं एक्कआ ॥ [एककं] ।

अवलम्बकैककयोजिता[6] युता सा चतुष्पदा च्छन्दसि ।
साधयत्येककं नाम वर्जित यस्य लक्षणे नाम ॥ ७० ॥

अवलम्बकेनोक्तलक्षणेन एककेन च वक्ष्यमाणेन योजित(ता) द्वाभ्यामन्यतमेन वा युक्ता[7] चतुष्पदा नाम च्छन्दसि भवति तस्यैककं नाम साधयामि । गुणा(त्रिगुण?)त्रिमात्रेण चैकैणै(नै)व प(पा)देन एककानि रचनीयानि[8] ॥ ७० ॥

जस्स इति ।

---

१ जस्स Com २ पटहकारसनवक AB ३ कापो AB ४ हेय AB ५ साहेइ Com ६ अवलम्बिकैकयोजिता AB. ७ युक्तश्चतुष्पदाना छन्दसि AB ८ रचनानि AB

जत्थ[1] रहं रहंगअं च पाए
दीसइ मुद्धिए णरिंदअं च ।
अंते कण्णअं च सोहणं से
वेण्टलअंति जाण छंदअस्मि ॥ ७१ ॥ [वृन्तलकं] ।

यस्य रथो रथाङ्गं च पादे दृश्यते मुग्धे नरेन्द्रोपि ।
अन्ते कर्णश्च शोभनश्च वृन्तलकमिति[2] जानीहि छन्दसि ॥ ७१ ॥

स्पष्टमिदम् ॥ ७१ ॥

पक्खिणाह[3] इति ।

पक्खिणाहअं दाविअं
सद्दअं च कण्णो[4] रवं ।
णेउरं च पाअंतए[5]
हंसिणीअ पाए पिए ॥ ७२ ॥ [हंसिनी] ।

पक्षिनाथो दर्शित. शब्दश्च कर्णो रव. ।
नूपुरस्तथान्ते हंसिन्याः पादे प्रिय(ये) ॥ ७२ ॥

दाविअ[6] दर्शितम् । हसिनीति नाम । स्पष्टमन्यत् ॥ ७२ ॥

खडहडक्कलक्षणार्थं[7] गाथामाह—भमरावलीअ इति ।

भमरावलीअ अंते गाहा जइ दिज्जए पओएसु ।
तं जाणह खडहडअं पुव्वकईहिं विणिद्दिट्ठं ॥ ७३ ॥
गाहा खडहडअलक्खणत्थे । [खडहडकं] ।

भ्रमरावल्या अन्ते गाथा यदि दीयते प्रयोगेषु ।
ततो जानीहि ष(ख)डहडक पूर्वकविभिर्निर्दिष्टम् ॥ ७३ ॥

अन्ते गाथाविधानात् खडहडक इति पूर्वकविभिर्नाम निर्दिष्टम् ॥ ७३ ॥

उदाहरणमाह—जइ पीणसमुण्णअ इति ।

जइ पीणसमुण्णअसंगअआ थणआ
जइ मंथरलोअणभूसिअअं वअणं ।
जइ वित्थइपीणविसंठुलओ जहणो
जइं तंविरपल्लवकोमलओ अहरो ॥ ७४ ॥

यदि पीनसमुन्नतसंगतौ स्तनौ यदि मन्थरलोचनभूषित वदनम् ।
यदि विस्तृतपीनविसंष्ठुल जघन यदि ताम्रपल्लवकोमलोऽधरः ॥ ७४ ॥

---

१ नन्न Com २ वृननिन्कमिनि AB ३ पक्खिगोणाहि AB ४ कण्णरव AB ५ पाअअतए AB ६ दाविसु दर्शिना AB ७ नम्हअन्क्षणार्थं AB ८ घटहटर्यं इति AB

इति भ्रमरावली ॥ ७४ ॥ गाथामाह—

ता कीस हिअअ रत्तिं दिअं च नो णिव्वुइं तुअं लहसि ।
दुल्लहमग्गिर विणिअत्त अहव संतो णिअत्तिहिसि ॥ ७५ ॥ खडहडअं [खडहडकं] ।

तत्कस्माद्धृदय[1] रात्रिं दिवं च नो निर्वृतिं त्व लभसे ।
दुर्लभमार्गे[2] विनिवर्तस्वाथवा शान्तं [नि]वर्तिष्यसे ॥ ७५ ॥

कश्चिद्दरिद्रियुवा वेश्यामासाद्य कुमारीवने पयोधराक्रान्तां दृष्ट्वा मन्मथाभिसंतप्तः तां च दुर्लभां मन्यमानो स्वहृदयमुपालभते । हे हृदय यदि नाम तस्याः पीनौ मांसलौ समुन्नतौ उत्तुङ्गौ[3] संगतौ[4] निपीडितपरस्परौ स्तनौ[5], यदि नाम तस्याः मन्थराभ्या अलसवलिताभ्यां लोचनाभ्यां भूषित मण्डितं मुखं, यदि च तस्याः विस्तृतः पृथुः[6] पीनो घनः तथा[6] विसंष्ठुलो मर्दन(मन्थर ?)गतिः जघनः कटिदेशो यस्या[7], यदि च ताम्रपल्लवकोमलोऽभिमतो वाधरः[7] तत् त्वं कथं[8] विनिवर्तस्व विरम्यतामस्माद्व्यवसायात् । अथवा सान्तः[9] उपरतः सन्निवर्तिष्यस इति ॥ ७५ ॥

पक्खिणाह इति ।

पक्खिणाहअं पिए
पत्थिवं च बीअअं ।
णेउरं च अंतए
खेडअस्स पाअए[10] ॥ ७६ ॥ [खेटक] ।

पक्षिनाथः प्रिये पार्थिवश्च द्वितीयः ।
नूपुरश्चान्ते खेटकस्य मुग्धिके ॥ ७६ ॥

विस्पष्टम् ॥ ७६ ॥

णेउरं[11] इति ।

णेउरभावमणिं सरसं जइ अ(मु)त्तिअअं
पेच्छसि पीणपओहरिए फरिसाण जुअं ।
पाअजुअं च सणेउरअं पुरओ ट्ठविअं
जाणसु लक्खणअम्मि मणोहरअं दइए ॥ ७७ ॥
मत्तागणसमं अणिदिट्ठरूअअं ।

१ वृत्तय AB २ दुर्व्वमसार्गेत्विनिवर्तस्व AB ३ वा उत्तुङ्गी AB ४ मुन्नती AB ५ स्तन AB ६ पृथुर्पीनघनतथा AB ७ वाधन AB ८ कालं AB A portion of the Com after this word is evidently lost ९ सांतिः उपनत AB १० मुद्धिए Com ११ णवरेति AB

नूपुरभावमणि सरसं यदि मौक्तिकं प्रेक्षसे पीनपयोधरे स्पर्शयोर्युगम् ।
पाद[युगं च] सनूपुर पुरतः स्थितं जानीहि लक्षण(णे) मनोहरं दयिते ॥ ७७ ॥

तन्मनोहर[1] रमणीय लक्षणे जानीहि । यस्याः प(पा)दे नूपुर[2]श्च भावश्च मणिश्च तद्यदि प्रेक्षसे सह रसेन[3] वर्तमाने(न) मौक्तिक गुरुं अनन्तर च यदि स्पर्शयुगं पश्यसि पुरतश्चाग्रे पादयोर्युगं सह नूपुरे[ण] वर्तमानम् । चरणा पञ्च गुरुश्चेत्यर्थ[4]. ॥ ७७ ॥

ततः किं भवतीत्याह—**इअ पाआण** इति ।

इअ पाआण चउण्हवि अंते गाहा पउंजए जत्थ ।
सोआणअंति णामं तस्स कइं(ई)हिं विणिस्माअं ॥ ७८ ॥ [सोपानक] ।

इति पादानां चतुर्णामन्ते गाथा प्रयुज्यते यत्र ।
सोपानक[5] इति नाम तस्य कविभिर्विनिर्मितम् ॥ ७८ ॥

इअ इति । पादचतुष्टयस्यान्ते गाथायाः सोपानक इति नाम भवति ॥ ७८ ॥

पढम इति ।

पढमणिरूविअअं जइ से गअंद[6]अं
वीअं संदणअं तइअं तुरंगअं ।
जइ वाणासणअं विरमे धअग्गअं
जीअँ[7] सुमणोहरंगिअ[8] सालभंजिअं ॥ ७९ ॥ [सालभञ्जिका] ।

प्रथमनिरूपितो यद्यस्य गजेन्द्र द्वितीय. स्यन्दनस्तृतीयस्तुरंग· ।
यदि वाणासन विरामे ध्वजाग्र जानीहि मनोहराङ्गि तां सालभञ्जिकाम् ॥ ७९ ॥

[ता सालभञ्जिका] जानीहि यदि गजेन्द्रादयः पादे निरूपिता भवन्ति ॥ ७९ ॥

त्रिकलकोटीना[9] लक्षणमाह—**जइ[10] तिअलअस्स** इति ।

जइ तिअलअस्स पुरओ दिज्जइं गाहा तलं[11] ति तं जाण ।
पुरओ अंते अ जहिं णअंगि तं तालविण्ह(ण्ठ)त्ति ॥ ८० ॥ [तल-तालवृन्ते] ।

यदि तृ(त्रि)कलकस्य पुरतो दीयते गाथा तलमिति तत् जानीहि ।
पुरतोन्ते च यदि नताङ्गि तत्तालवृन्त[12]मिति ॥ ८० ॥

त्रिकलकस्याद्यस्थितया गाथया तदा(ला)ख्येत्यु[त्प]द्यते तस्यैवाद्यन्तवर्तिन्या तया तालवृन्तसञ्ज्ञा भवति ॥ ८० ॥

साअर इति ।

---

१ दयिते तन्मनोहरं repeated after this word in both A & B २ नूपुरास्य AB ३ रेसे च AB ४ चेदित्यर्थ AB ५ सोपानामक इति AB ६ गअदब्य AB ७ जाणसु मणो० Com ८ सुमणोहरत्तिअं AB ९ त्रिकलादीनां १० धइ तिअअलस्सेति ११ तल्मि न AB १२ तालवृन्तमित्तमिति AB

साअरपाअघडिअपाअक्कतुरंगअं
गअरहविहअणाहविणिओइअअंतअं ।
समरंणिउत्ततुरअकरवालरहंगअं
पाणिअअग्गएहिं उग्गीअअ रूअअं ॥ ८१ ॥ [उद्गीतक] ।

सागरपादरचितपदातितुरंगं गजरथविहगनाथविनिर्योजितान्तम् ।
समरे सुखे तुरगकरवालरथाङ्गं पाणिध्वजा[ग्रा]भ्यामुद्गीतकरूपकम् ॥ ८१ ॥

यत्र सागरपादे विषमपादे रचितः पदाति तुरगश्चेद्भवति । किंभूतम् । गजरथविहगनाथैर्विनियोजितोन्तो यस्य । तत्राङ्ग(?) समरसुखे तुरगकरवालरथाङ्गं भवति । कीदृक् । पाणिध्वजाग्राभ्यामुपलक्षितम् । तदुद्गीतकस्य रूपकम् । विहगनाथो गरुडः । करवालः पञ्चमात्रः ॥ ८१ ॥

जइ पेच्छसि इति ।

जइ पेच्छसि पीणपओहरिल्लिए
जोहं सरहं तुरअं णरिंदअं ।
विरमे कडअं वेण्णोज्जलं ठियं
लक्खणए भण्णइ सा मणोरमा ॥ ८२ ॥ [मनोरमा] ।

यदि पश्यसि पीनपयोधरिके योध सरथं तुरगं नरेन्द्रम् ।
विरामे कटक वर्णोज्ज्वलं स्थित लक्षणे जानीहि तां मनोरमाम् ॥ ८२ ॥

यदि योधादिसंज्ञाचतुष्टयोपलक्षित चतुर्मात्रचतुष्टयं पश्यसि ततस्तामस्मिन् लक्षणे मनोरमा जानीहि । वर्णैरक्षरैरुज्ज्वलमिति सकलगणविशेषणम् ॥ ८२ ॥

पुरओ इति ।

पुरओ रहं णरिंदं च्छउए जइ पाए
णवरि तुरअं विसालं पसअच्छि णिउत्तं ।
पाइक्कआण दोण्हं अंते जइ चमरं
अंतुलुअंति छंदे तं जाण णअंगि ॥ ८३ ॥ [अन्तुलुक्कं] ।

पुरतो रथ नरेन्द्र छाते यदि पादे अर्थ(न)न्तरं गजं विशालं प्रसृताक्षि नियुक्तम् ।
पदात्योर्द्वयोरन्ते यदि चमैर अन्तुलुकमिति मुग्धे तं जानीहि नताङ्गि ॥ ८३ ॥

छउए तन्वि । णवरि अनन्तरम् । विशा(सा)लं विस्तीर्णं गजविशेषणमेतत् । स्पष्टमपरम् ॥८३॥

जत्तु पिए इति ।

१ समरे सुहे Com २ विनिर्दिष्ट AB ३ ममनखे AB ४ सरअह AB ५ चणोज्जल धिय AB ६ लक्खणए जाणसु त मणोरम Com ७ कोव AB ८ विनामं AB ८ The words चतुर्मात्रचतुष्टयोपलक्षित are found before this word in A & B ९ रहणरिंदच्छउए AB १० अ गअ Com ११ णअम्मि AB १२ पादाघो AB १३ चरस AB १४ अन्धुलुक AB. १५ तथी AB

जंइ अ पिअं(ए) तिण्णि गआ
समरे अहिअं णेउरअं ।
पसअच्छि विआण सआ
चंदोज्जे(ज्जो)अअ वित्तमिमं ॥ ८४ ॥ [चन्द्रोद्योतकं] ।

यत्र प्रिये त्रयो[2] गजाः समरे[3] अधिक नूपुरम् ।
प्रसृताक्षि विजानीहि सदा चन्द्रोद्योतकवृत्तमिदम् ॥ ८४ ॥

यत्र सर्वत्र पादेषु चतुर्मात्रत्रय भवति समरे समपादे यन्नूपुरं तच्चन्द्रोद्योतकाक्षं[ख्य] वृत्त जानीहि ॥ ८४ ॥

पढम इति ।

पढमगइंदविणिओइएहिं
वीअअतइअतुरंगमएहिं ।
जाणसु कण्णविरामअएहिं
सुंदरि रासाणं अ पाएहिं ॥ ८५ ॥ [रासः] ।

प्रथमे गजेन्द्रैविनियोजितैर्द्वितीयतृतीयकतुरंगमैः ।
जानीहि विरमेस्थितकर्णैः सुन्दरि र(रा)सानां पादैः ॥ ८५ ॥

प्रथमेन गजेन्द्रेन(ण) नियोजिता यैते(यैस्ते) तथा । एवं सर्वत्रैत्र बहुव्रीहिर्द्रष्टव्यः ॥ ८६ ॥

सदानि[तं]कादीना लक्षणमाह—**दोहिं संदाणिअअ** इति ।

दोहिं संदाणिअअं तिहि गाहाहि अ विसेसअं णामं ।
चउजुत्तं चक्कलअं पंचहि कुलअं च णाअव्वं ॥ ८६ ॥

द्वाभ्यां सन्दानितक तिसृभिर्गाथाभिर्विशेषकं जानीहि ।
चतुर्युक्ते चक्कलकं पञ्चभि कुलक ज्ञातव्यम् ॥ ८६ ॥

एकवाक्या(क्य)निबन्धनेन द्वयो. सदानितकाख्या भवति । एवं तिसृणा विशेष[क]संज्ञा । तद्वच्चति(त)सृणां चक्कलकाख्या । तथैव पञ्चानां कुलकाभिधा । अत्र च गाथोपलक्षणम् । तेन सर्वेषा वृत्ताना सदानितकादिसंज्ञा एव(व) प्रवर्तन्ते एव ॥ ८६ ॥

किं च । कुलकानामन्येऽपि प्रभेदा विद्यन्ते तानाह—**णरा(र)णारायण** इति ।

णरणाराअणवासुइअणंतकेलाससंकरमइंदा ।
दिणअरजीअगुहत्ति अ दस भेआ होंति कुलआणं ॥ ८७ ॥

१ जत्तु पिम Com २ उपयो AB ३ समएधेकं AB ४ प्रसृतलक्षि AB ५ तत्–यत् AB ६ विणिओइअएहिं AB ७ विरमट्ठिअकण्णेहिं Com ८ Com seems to read रासाण पाअएहिं ९ गजेन्द्रोनियोनितै AB १० अन्यत्र ? or प्रथमेन गजेन्द्रो विनियोजितो यैस्ते ? ११ Between सज्ञा and तद्वत् A has तद्वच्चतिचकुलाना धारव्या भवति एव तिसृणा विशेपसंज्ञा १२ कुलकानामान्योपि AB. १३ महिंदा Com

नरनारायणवासुक्यनन्तकैलासगकरमहेन्द्राः ।
दिनकरजीवगुहा इति दश भेदा भवन्ति कुलकानाम् ॥ ८७ ॥

स्पष्टम् ॥ ८७ ॥

किं च ।

परिवाडीए णामा पंचारंभंमि चोद्दहं जाव ।
एंत्ते[1] परेण कव्वं करेह इच्छाइ वीसत्थो(त्था) ॥ ८८ ॥
गाहा कुलयलक्खणत्था ।

परिपाट्या नामानि पञ्चारम्भे चतुर्दश यावत् ।
ततः परेण काव्यं कुरुतेच्छयौ विश्वस्ताः ॥ ८८ ॥

एतानि नामानि परिपाट्या क्रमेण पञ्चभ्य आरभ्य यावच्चतुर्दश जानीहि । अत्र नाभिनिवेष्टव्यं यद्गाथाभिरेव सदानितकादीना व्यवस्थितिः । उपलक्षणमात्रकमेतत् । यस्मात् लक्ष्ये हि श्लोकादिति(भि)र्दृश्यन्त एव । ए(त)तश्च [परेण] गुहाख्यादूर्ध्वमिच्छया महाकाव्यादिक काव्य कुरुत । केवलं कुलकसज्ञा न भवतीत्यर्थः । परेणेति तृतीयान्तप्रतिरूपको निपातः ॥ ८८ ॥

गलिता आह—**सत्तिदंड** इति ।

सत्तिदंडं[3]करवालतुरंगगअंदआ
अंतअम्मि छउओअरिए सधअग्गआ ।
छंदअस्मि रमणिज्जअ सोम्मिअ[4] सरिसिए
तं विआण संपिंडिअअं गलिअं पिए ॥ ८९ ॥ [संपिण्डिता] ।

शक्तिदण्डकरवालतुरंगगजेन्द्राः[5] अन्ते छातोदरि सध्वजाग्राः ।
छन्दसि रमणीयके(क)सोम्यासदृशीं तां विजानीहि संपिण्डितां गलितां प्रिये ॥ ८९ ॥

हे प्रिये तां संपिण्डिताख्यां गलितां जानीहि । यस्याः शक्तिश्च दण्डश्च करवालश्च तुरंगमश्च गजेन्द्रश्चेति भवन्ति । द्वौ पञ्चमात्रौ द्वौ चतुर्मात्रावित्यर्थः । करवालश्च खड्गः । ते चान्ते विरामे सह ध्वजाग्रेण त्रिमात्रेण वर्तमानाः । किंभूताः(ता) सपिण्डिताम् । रमणीयकस्य वृत्तस्य (४.२६) सोम्यायाश्च द्विपद्याः (३.२७) सदृशी ॥ ८९ ॥

अह रह इति ।

अह रहथणगइंदणरणाहतुरअथणहार-
संदंण[6]अणरवरिंदगअथणहरा सतुरआँ[7] ।

---

१ तत्तो Com २ च्छाया विध्वस्ता AB. ३ सत्तिदडडकर० AB ४ सोमाअ AB ५ तुरगमश्च गजेन्द्र AB
६ सदणाण णर० AB. ७ सतुरगआ AB.

पमुहदुमत्तअंस णरणाहठाणए जइ हुवंति
पसअच्छि विप्पआ तो पिए विसाला ॥ ९० ॥ [विशाला] ।

एषा रयस्तनगजेन्द्रनरनायतुरगस्तनभरस्यन्दनकरन[र]वरेन्द्रगजस्तनभराः सतुरगाः ।
प्रमुखद्विमात्राश्च नरनाथस्थाने यदि भवन्ति प्रसृताक्षि विप्राः तत. प्रिये विशाला ॥ ९० ॥

तत एषा विशालाख्या गलिता प्रिये भवति। यदि रयश्च स्तनश्च गजेन्द्रश्च नरनाथश्च तुरगश्च स्तनभरश्च स्यन्दनश्च नरवेन्द्रश्च गजश्च स्तनभरश्चेति तुरगेण सह भवन्ति। एकादश चतुर्मात्रा इत्यर्थ । किंभूता. । प्रमुखे द्विमात्रो येषाम् । अस्य एव मध्यगुरुस्थाने विप्रा न विरुध्यन्ते ॥ ९० ॥

विच्छं(च्छि)त्तीअ इति ।

विच्छित्तीअ दुमत्तं तह पंच अ जोहा ।
मुद्धे णरवइरहिआ कइसत्थणिउत्ता ॥ ९१ ॥ विच्छित्ती ।

विच्छित्तेर्द्विमात्रः तथा पञ्च [च] योधाः ।
मुग्धे नरपतिसहिता. कविसार्थनियुक्ताः ॥ ९१ ॥

विच्छित्तेः कविसार्थेन स्वप्रबन्धेषु द्विमात्राः प्रमुखे नियुक्ताः पश्चाच्चतुर्मात्राः पञ्च । अस्या मात्राभ्यो द्वादशभ्यो यति· कार्येत्युदाहरणेनोक्तम् ॥ ९१ ॥

भामिनि(णि) इति ।

भामिणि रहणरिंदपाइक्कराअसंदण णअंगि सुरवारणिंदा ।
पमुहे पसरिआइ णिअमेण होंति धवलच्छि दोतइअपंचमत्ता ॥ ९२ ॥ [प्रसृता] ।

भामिनि रथनरेन्द्रपदातिर(रा)जतुरगा नताङ्गि स्व(सु)रवारणान्ता. ।
प्रमुखे प्रसृतायाः नियमेन भवन्ति प्रसृताक्षि द्वे तिस्रः पञ्चमात्राः ॥ ९२ ॥

रथश्च नरेन्द्रश्च पदातिश्च राजा च तुरगश्च ते प्रसृताया. भवन्ति । किंभूता· । सुरवारण आदिलघुरन्ते येषाम् । किं च । अस्या एव प्रमुखे आदौ द्वे तिस्र. पञ्च चेति साकल्येन दशमात्रा भवन्ति । एवमत्रर्थलिप्ता· (?) ॥ ९२ ॥

पंचमतइअअ इति ।

पंचमतइअसुअणणआ रअणविरामएसु
कइवसहेहिं णिउत्तआ भामिणि कव्वएसु ।
पढमअवीअचउत्थया महुरक्खरिल्लएसु
तिण्णि वि मुद्धे जोहआ ललिआपाअएसु ॥ ९३ ॥ ललिता ।

---

१ पमुहदुमत्तआ स Com २ तुरगजेन्द्र AB ३ भारस्यस्यन्दन AB ४ प्रभृतलक्षि A, प्रसृतक्षि B ५ प्रवृद्धैर्द्वि० AB ६ स्वप्रबन्धवृद्धिमात्रा. AB ७ रायतुरआ Com. ८ सुरवारणंता Com ९ होंति सअधव० AB १० पसअच्छि Com. ११ दो तअअअ पंच० AB १२ प्रसृत्यक्षि AB १३ Both A and B add स्यन्दनश्च after this word. १४ रअनं विरामएअंनएसु AB १५ गुकअवसहेहिं सुणिउत्तआ AB १६ कव्वेठएसु AB

पञ्चमतृतीयसुव(प)र्णौ रत्नविरामेषु कविवृषभैर्नियुक्ता भामिनि काव्येषु ।
प्रथमद्वितीयचतुर्थो मधुराक्षरेषु त्रयोऽपि मुग्धे योधा भवन्ति [ललितापादेषु] ॥ ९३ ॥

[ललिता]पादेषु पञ्च[म]तृतीयौ सुपर्णौ गरुडौ जातः(तौ) किंभूतेषु । रत्नं विरामे येषाम् । तथा प्रथमद्वितीयचतुर्थास्त्रयोपि योधा[1] भवन्ति । किंभूताः । [भामिनि] काव्येषु' स्वप्रबन्धेषु मधुराक्षरेषु कविवृषभैः कविश्रेष्ठैः नियुक्ता रचिताः ॥ ९३ ॥

थणहर इति ।

थणहरो सअण्णो णरिंदओ ।
पमुहेए[2] अ दिण्णो दुमत्तओ ।
पा[अ]एण पाउ(ओ) अ जं[3] ठिउ(ओ)
तं विआण अंते[4] विहूसणं ॥ ९४ ॥ [विभूषणा] ।

स्तनभारः सकर्णो नरेन्द्रः अन्तप्रमुखे दत्तद्विमात्रः
पादेन पादो यदि यमितः तां विजानीहि छन्दसि विभूषणाम् ॥ ९४ ॥

तां विभूपणां जानीहि यस्या प्रमुखे स्तनहारो मध्यगुरुः सह कर्णेन वर्तमानः ततोऽपि मध्यगुरुरेव[5] । अन्ते प्रमुखे च दत्तः[6] द्विमात्रो यस्येति पादविशेषणम् । पादेन च सह यदि पादो न(य)मितः । यद्यपि सर्वा गलिताः[7] संयमका वक्ष्यति तथापीह वचनं समस्तपादनिवृत्त्यर्थम् ॥ ९४ ॥

सामुग्गअ इति ।

सामुग्गअंति णामेण रूवअं विरईइ(इ)अं मए जं च ।
सा उग्गअत्ति गलिआ जमएहिं [पुरिल्लअकएहिं][8] ॥ ९५ ॥

सामुद्गक इति नाम रूपकं विरचितं मया यच्च ।
सा उद्गतेति गलिता यमकैः पौरस्त्यकृतैः ॥ ९५ ॥

स(सा)मुद्गत(क)मेवोद्गता । उद्गतायाः पुरः[9]स्थिता यमकरचनेति विशेषः । स(सा)मुद्गकस्यान्ते 'गएँहिं विलग्गएहिं'[10] (४·५६) इत्यादिना यमको दर्शितः ॥ ९५ ॥

पंचम इति ।

---

१ The writer of the palm leaf ms has dropped the portion of the Com from पादेषु upto योधा (both inclusive) The dropped portion of the Com, however, is given in the Commentary on the next stanza, see note 7 below, we actually get the following commentary on this stanza किंभूता । किंवृषभै कविश्रेष्ठै स्वप्रबन्धेपु नियुक्ता रचिता भवन्ति । किंभूता भवन्ति । कविवृषभै कविश्रेष्ठै नियुक्ता भामिनि काव्येपु स्वप्रबन्धेपु । प्रथमद्वितीयचतुर्थ-मधुराक्षरेपु त्रयोपि दव्वे रचिता नियुक्ता । २ अतपमुहदिण्णो Com ३ Com seems to read जमिओ ४ छंदे Com ५ मध्यगुरु एव AB ६ दतो त्रिमात्रो AB ७ The dropped portion of Commentary on v 93 mentioned in note 1 above (from ललितापादेपु to त्रयोपि योधा· both inclusive) is copied out here between the words गलिता and सयमकाः in both A & B ८ Reconstructed from Com ९ पुन स्थिता यामकरचनेति AB १० गवहिं विलग्गएएहिं AB

पंचमत[इ]अएहिं मुद्धे णराहिवेहिं ।
वीअचउत्थछट्ठगअतुरअसंदणेहिं ॥
प(पा)आ पमुह[अ]म्मि घडिआ दु[म]त्तएहिं
जाणह लंविआएँ गलिआएँ पाअएहिं ॥ ९६ ॥ लंविआ [लम्बिता] ।

पञ्चमतृतीय(यै.) मुग्धे नराधिपै. द्वितीयचतुर्थपष्ठै[1]र्गजतुरगस्यन्दनैः ।
पादा[3]. प्रमुखे घटिता द्विमात्रैः जानीहि लम्बितताया गलिता[या.] प्राकृतैः[2] ॥ ९६ ॥

प्राकृते(तैः) प्राकृतभाषाया लम्बितताया गलितायाः पादाः घटिताः । पञ्च[म]तृतीयैर्नराधिपैरुपलक्षिताः द्वितीयचतुर्थपष्ठैः सामान्येन चतुर्मात्रैरिति । अत्र प्रमुखे र(च) द्विमात्रैरुपलक्षिता ॥ ९६ ॥

पमुहअ इति ।

पमुहअविरमएसु पाँए[4] दुमत्तआ
पंचमतइअआएँ मुद्धे णरिंदआ ।
वहुकइसत्थएण वहुसो णिरूविआ
वीअचउत्थजोहसहिअत्ति[5] सा सुहा ॥ ९७ ॥ [सुधा] ।

प्रमुखे विरामे यस्या द्विमात्रौ[6] पञ्चमतृतीयौ मुग्धे नरेन्द्र(न्द्रौ) ।
वहुकविसार्थे[7]न वहुशो निरूपिता द्वितीयचतुर्थयोर्धसहितेति[8] [सा] सुधा ॥ ९७ ॥

[सा] सुधा नाम गलिता यस्य(स्या) वहुना कविसार्थेन कविसमूहेन प्रमुखे र(त)था विरामे द्विमात्रौ निरूपितौ । द्वितीयचतुर्थाभ्या [योधाभ्या] सहितेति सुधाविशेषणम् ॥ ९७ ॥

तुरअ इति ।

तुरअरहं प(पा)इक्कं णराहिवं जत्थ[9]
दीसइ[10] जीअ तुरंगं सचामरं अन्ते ।
थोरोरु विअडजहणे सुदीहराच्छिजुए
सा कुमुइणित्ति भणिआ कईहिं णिउणेहिं ॥९८॥ कुमुहइणी [कुमुदिनी] ।

तुरगरथ पदातिर्नराधिपो मुग्धे दृश्यते यस्यास्तुरग[11]. सचामरोऽन्ते[11] ।
थोरोरुविकटजघने सुदीर्घतरा[12]क्षियुगे सा कुमुदिनीति भणिता कविभिर्निपुणै. ॥ ९८ ॥

एवभूता कुमुदिनीति भणिता । तुरगश्च रथश्च तुरगरथम् । थोर परिवर्तुलम् । विकटो विस्तीर्णः स्पष्टमन्यत् ॥ ९८ ॥

पढम इति ।

---

१ नराधिपैरुपलक्षिते द्वितीय० AB २ प्राकृताया प्रकृते AB ३ पादघटित्ता AB ४ जाँए Com. ५ जोहससण्णिहिअत्ति सा सुहा AB ६ द्वौ मात्रौ AB ७ सार्थे AB ८ योवहसितेति AB ९ मुद्धे Com १० दीसइ जत्थ जीअ तुरग सचामर अन्ते AB ११ तुरगौ समरांते AB १२ सुदीक्षितराक्षयुगे B A drops all portion from सुदीक्षित to एवभूता कुमु- (both inclusive) in the next line.

पढसगअंदबीअकरवालबंधसुविहूसिअं
तइ[1]अणिउत्तबाणसचउत्थचारुथणहारिअं ।
संदणओ पुणोवि धअवट्टएण अइ[2]सोहिअं
जाणस(सु) छंदअम्मि मुद्धमुहिए इम(मं) णलिणिअं ॥ ९९ ॥ ण(न)लिनी ।

प्रथमगजेन्द्रद्वितीयकरवालबन्धसुविभू[3]षितां तृ[4]तीयनियुक्तबाणसचतुर्थचारुस्तनभारिणीम् ।
स्यन्दनः पुनरपि ध्वजपट्टकेनातिशोभितां जानीहि छन्दसि मुग्धमुखि इमां नलिनीम्[4] ॥ ९९ ॥

प्रथमेन गजेन्द्रेणोपलक्षिताम् । द्वितीयेन च करवालेन खड्गेन[5] योऽसौ बन्धो विरच[6]ना तया विभूषिताम् । अन्यच्च । तृतीयो नियुक्तो बाणो यस्याः सह च चतुर्थस्थाने स्तनभरे[ण] वर्तते या ताम् । स्पष्टमन्यत् ॥ ९९ ॥

मुखगलितामाह—**खंडुग्गअ** इति ।

खंड(डु)ग्गअत्ति भणिआ जा पढमं सावि होइ मुहँगलिआ ।
डंडअप[7]यगइणिअमा समंसआ जमिअपाअंता ॥ १०० ॥ [मुखगलिता] ।

खण्डोद्गतेति भणितो[8] या प्रथम सा[पि] भवति मुखगलिता ।
दण्डकपदगतिनियमा[9] स[10]मांशकावस्थितपादान्ता ॥ १०० ॥

या मयास्मिन्लक्ष[11]णे प्रथम खण्डोद्गता [[12]इति भणिता सा मुखगलिता]ख्या भवति । इयांस्तु भेदो यदिय दण्डकस्य सदृशीं पदरचना बिभर्ति सदृशैस्त्रि[13]कैर्निबन्धनमादौ लघुस्थितिश्चेति कर्तव्यमित्यर्थः । अन्यच्च । समांशिका समानसंख्यगणा । सम [इति] द्वितीयचतुर्थापेक्षया । प्रथमतृतीयौ यस्याः 'कर्[14]मेत्त' (४ ४७) इत्यादिना नियतलक्षणावेव । एतदुक्त भवति । प्रथमतृ[15]तीयौ खण्डोद्गतासदृशौ द्वितीयचतुर्थौ दण्डकच्छायाविति ॥ १०० ॥

अस्या भेदानाह—**पंचगणा** इति ।

पंचगणा सत्तगणा णवगणएआह(र)हेहि अ गणेहिं ।
मुहगलिआए भेआ अंसअवड्ढीइ चत्तारि ॥ १०१ ॥
गाहा लक्खणत्थे ।

पञ्चगणाः सप्तगणाः नवगणै[16]कादशभिस्तु गणैः ।
मुष(ख)गलितायाः भेदा अंशकवृद्ध्यां[17] चत्वारः ॥ १०१ ॥

---

१ The whole line is repeated immediately in AB २ अइसोहिअभ AB ३ सभूपित AB ४ The portion from तृतीय to नलिनीम् is dropped in both A and B ५ खड्गी योसौ AB ६ विरचनया AB ७ मुहुगणिआ AB ८ पयग्गइ AB ९ भणितो स AB १० नियमसमासक्रोवस्थिता पादान्ता AB ११ लक्षलक्षणे AB १२ The portion from इति to गलिता (both inclusive) is dropped in both A and B १३ स्तृकै AB १४ कमेत्त AB १५ प्रथमतृयो A, प्रथमत्रयौ B १६ नवमगणा एका० AB १७ वृद्धाश्चत्वार AB

चत्वारो सुखगलिताया भेदा भवन्ति अंशकानां वृद्धया। तत्रैकः पञ्चगणो द्वितीयः सप्तगणः तृतीयो न[वगणैः] भवति, एकादशभिश्चतुर्थ इति। अत्र केचित् दण्डकपदगी(ग)तीनां नियमोऽयमिति वर्णयन्ति। अपरे सामान्येन गणैरिच्छन्ति। तत्र दण्डकपदगतिपक्षे लघुपट्कादूर्ध्वं गणसंख्याविपक्षा (विकल्पाः?) ॥ १०१ ॥

तुरअ इति।

तुरअगइंदरहंगआ
चउसुवि पाअएसु जीसे।
पअगलिआ सा भण्णइ
जमिआ एक्कस्मि पाए ॥ १०२ ॥ [पदगलिता]।
पअगलिआलक्खणरूवअं।

तुरगगजेन्द्ररथाङ्गादि(नि) चतुर्ष्वपि पादेषु यस्यां।
पदगलिता [सा] भण्यते यमितैकस्मिन्पादे ॥ १०२ ॥

एकस्य पादस्य यादृग्रूप तादृक् चतुर्णां यथा—'विअलिअविसहिरकसणया'। स्पष्टमन्यत् ॥ १०२ ॥

अपरमपि पदगणि(लि)ताया भेदमाह—**साअ(मु)ग्गअ** इति।

सामुग्गअजमएणं जमिआ जा सा विहूसणा णाम।
अट्ठमजमअणिबद्धा पअगलिआ सा विणाअव्वा ॥ १०३ ॥ [पदगलिता]।

सामुद्रकयमकेन यमिता यासौ विभूषणा नाम।
अष्टमयमकनिबद्धा पदगलिता सापि ज्ञातव्या ॥ १०३ ॥

विभूषणा नाम या गलिता उक्ता सा यदि सामुद्रकयमकेन निबध्यते तत्सापि पदगलिताख्यां लभते। सामुद्रके यमकः तेन। एतदुक्त भवति। विभूषणाच्छन्दसि सामुद्रकसंबन्धिना यमकेनापरापि पदगलिता भवति। यस्मात्पदगलितायाः समस्तपादयमकविधानं सामुद्रके त्वेकदेश एव। एतदेव द्रढयति—**अट्ठ[म]जमय** इति। अष्टभागनिबद्धेन यमकेनेत्यर्थः। यमकाना हि चतुर्भागार्धादिव्यवस्था दृश्यन्ते यतः ॥ १०३ ॥

पढम इति।

पढमतइआ अ तुरआ अ
बीउ(ओ) थणहरो मणी अंते।
विसमन(ग)लिआए समरेसुं।
गअ दो चावआ मणी अंते ॥ १०४ ॥ [विषमगलिता]।

---

१ यस्य ते AB २ अष्टपयपरुनिरुद्धा पचगलिता AB ३ विभूपिता AB ४ सबन्धिनादयमकेन AB ५ सा सामुद्रकत्वैकादश एव AB ६ व्यवस्था या दृश्यन्ते.

प्रथमतृतीयौ तुरगौ च द्वितीयः[1] स्तनभरो मणिरन्ते ।
विषमगलितायाः समरेषु गज चापकयुग मणिरन्ते ॥ १०४ ॥

विषमगलितायाः प्रथमतृतीयौ चतुर्मात्रौ द्वितीयः स्तनभरो मध्यगुरुरन्ते च [मणिः इति] विषमपादलक्षणम् । समरेषु समपादेषु गजश्चापयुगं[2] तद्भवत्यन्ते च मणिः ॥ १०४ ॥

जीए(अ) इति ।

जीअ तुरंगबाणरहजुअलअधणुपाइक्क(क्का) रहधयवट्टआ ।
माला ईरिसा[3] उत्त वरकविसुइसुहअ विरइआ मइ च्छंदए ॥ १०५ ॥
इअ गलिआलक्खणं समत्तं । माला ।

यस्यास्तुरंगबाणरथयुगलधनुष्पदातयो रथध्वजपटौ ।
मालेदृशी भवति वरकविश्रुतिसुभगोदिता मया छन्दसि ॥ १०५ ॥

मया विरचिता या वरकवीनां श्रुतिसुभगा भवति ॥ १०५ ॥

एवं गलिताया लक्षणमुक्तम् । अनुक्तविषयाणां गलितानां विशेषमाह—**सव्वाणं** इति ।

सव्वाणं चिअ गलिआण जमअबंधं कुणंति कई(इ)वसहा ।
अंसअवसेण एआण तं मए विरई(इ)अं णेहं[4] ॥ १०६ ॥

सर्वासां [एव] गलितानां यमकबन्धं कुर्वन्ति कविवृषभाः ।
अंशकवशेनैतासां[5] तन्मया विरचितं नैव ॥ १०६ ॥

कविश्रेष्ठाः सर्वासां गलितानां यमक निबध्नन्त्यशकवशेन । अल्पांशिकायाः स्वल्प महत्याश्च महान्तमिति । तन्मया विरचितं नैव उदाहरणेन मातीति (?) शेषः ॥ १०६ ॥

इदानीं सर्वजातिविषयान्तरमाह—**सर्वासु** इति ।

सव्वासु छंदजाइ(ई)सु णरवई एत्थ[6] साहिओ जेत्थ[6] ।
जइ होइ तासु विप्पो दोसो वि ण सो गणेअव्वो ॥ १०७ ॥

सर्वासु च्छन्दोजातिषु नरपतिरपि साधितो मया यासु ।
यदि भवति तासां विप्रो दोष इति नासौ गणयितव्यः ॥ १०७ ॥

यासु वृत्तजातिषु मध्यगुरुः कथितः तासु सर्वलघोः स्थितिर्न विरुध्यते इति ॥ १०७ ॥

केषांचिद्वृत्तानां यानीह नामानि कथितानि शास्त्रान्तरेषु यद्यप्यन्यथा दृश्यन्ते तथापि न दोष इत्याह—**अन्नं** इति ।

अण्णं वाहरइ पिआ अण्णं जणणी जहा सिलिंबाण ।
छंदेवि तहा मुद्धे जाणसु[7] वित्ताइं णामाइं ॥ १०८ ॥

---

१ द्वितीयनभरौ AB २ भुजगश्चापयुग AB ३ इरिसा उत्तह AB, ईरिसी होइ Com ४ णेव Com. ५ ०वसेनैताकविसा AB ६ साहिओ मए जासु Com ७ जानीह A, जानीहि B

अन्यद् व्याहरते प्रिया अन्यैर्जननी यथा सिलिम्भानाम् ।
छन्दसि य(त)था मुग्धे जानीहि वृत्तानां नामानि ॥ १०८ ॥

एतदुक्त भवति । नाम्नि नाभिनिवेष्टव्यम् । अत्र दृष्टान्तद्वारेण युक्तिरुच्यते । पुरुषाणा यथा पृथक् वल्लभसुभगदयितादिभिः नामभिर्व्याहरते तथा सिलिम्भा बालास्तेषां च जातवत्सेत्यादिभिर्नामभिर्मातो[2] व्याहरतेऽर्थवशात्तद्वदेव छन्दसि वृत्तानां नामानि बन्धवशात् भवती(न्ती)ति । तथा चोक्तम्—

अपत्यस्य च [जा]तस्य वृत्तस्योत्पादितस्य च ।
नाम स्वच्छन्दत कार्यं सैतवस्य वचो यथा ॥

इति ॥ १०८ ॥

परिमाणं इति ।

परिसाणं णत्थिच्चिअ णअंगि वी(वि)त्ताण जीअलोअम्मि ।
अणुदिअहं कइसत्थो अज्जवि विरएइ अण्णण्णे ॥ १०९ ॥

इअ कइसिट्ठविरत्तजाईसमुच्चये चउत्थो णिअमो समत्तो ॥

परिमाण नास्त्येव नताङ्गि वृत्तानां जीवलोके ।
अनुदिवसं कविसार्थो अद्यापि विरचयत्यन्यदन्यत् ॥ १०९ ॥

अस्यायमर्थः । वृत्तान्यपरिमेयानि अपरिमेयश्च कविसार्थोऽप्यद्यापि अन्यदन्यन्नवं नवं विरचयति । एतदेव प्रयोजनमाचार्यस्य अस्य स्व(प्र)वृत्तौ पिङ्गलविरचितेषु सत्स्वपि शास्त्रेषु महाकविप्रबन्धेषु दृश्यन्ते यानि वृत्तानि तानीह रचितानि यस्मात्तेन सगृहीतानीति ॥ १०९ ॥

[इति] चतुर्थो नियमः ।

---

१ अन्यजनिनी AB २ नामभिर्दात AB

पञ्चमो नियमः ।

गौ रत्नांशः ॥ १ ॥

इदानीं वर्णवृत्तानां विषमपदोच्चयविवृतिरारभ्यते । गौर्नाम वृत्तं यस्य रत्नांशमात्रः पादो भवति ॥१॥

मुक्तायुग्मं नौरित्युक्ता[1] ॥ २ ॥

द्व्यक्षरा नौर्नामोक्ता[2] यस्याः पादे मुक्तायुग्मं गुरुद्वयमुक्तमिति ॥ २ ॥

द्वे रत्ने
वैदूर्यम् ।
सा नारी
ज्ञातव्या ॥ ३ ॥

नारी गुरुत्रयं भवति ॥ ३ ॥

सपटहं
मरकतम् ।
प्रियतमे
मृगवधूः ॥ ४ ॥

मृगवधूर्नाम । पटहः तृ(त्रि)लघुगणः । मरकतो[3] गुरुः[3] ॥ ४ ॥

नूपुरहस्तौ
रत्नविरामौ ।
अक्षरपङ्क्तिर्
नाम मृगाक्षि ॥ ५ ॥

कर्णं कुरु भद्रे
स्पर्शं सपताकम् ।
अन्ते चमरं चेद्
बाले तनुमध्या ॥ ६ ॥

रत्ने नूपुरयुक्ते
भावश्चैव तु पश्चात् ।
कर्णश्चेन्निधनस्थो
भद्रे सा मर्दलेखा[4] ॥ ७ ॥

---

१ गौ AB २ नामोक्तौ AB ३ मरको गुरो· AB ४ दमलेखा AB.

रसरवसहितं
सपटहचमरम् ।
शशिमुखि सुभगे
हरिविलसितकम् ॥ ८ ॥

हरिविलसितस्य रसरवाभ्यां सहित सलघुत्रयं च चामर भवति ॥ ८ ॥

आदौ कर्णौ नित्यं भद्रे
रत्ने तस्मात्पश्चात्कृत्वा ।
अन्ते शुभ्रं मुक्तायुग्मं
ज्ञेयं वृत्तं विद्युन्माला ॥ ९ ॥

रत्ने रसरवौ प्रिये
केयूरसपरं भवेत् ।
रूपं सकटकं सदा
श्यामा सुतनु कीर्तिता ॥ १० ॥

या(श्या)मायाः प्रथमं रत्ने[1] च ते भवतः ॥ १० ॥

नूपुरशब्दनरेन्द्रान्
भामिनि पश्यसि यत्र ।
रूपयुतं[2] यदि कर्ण
शोभनं[3] एष वितानः ॥ ११ ॥

एष शोभनो वितानो नाम यत्र नूपुरादीन्पश्यासि तथा रूपेण च युतं यदि कर्णम् ॥ ११ ॥

चामर[4]भावौ कटकौ
पश्यसि हस्तं दयिते ।
यस्य च नित्यं ललितं
माणवकक्रीडितकम् ॥ १२ ॥

पक्षिनाथवैजयन्ती
रूपहारमौक्तिकानि ।
नीलनीरजाक्षि मुग्धे
मालिनीति नाम वृत्तम् ॥ १३ ॥

---

१ रत्न रत्ने AB २ रूपसमेतसकर्णं AB ३ प्रकट AB ४ चमर० AB

द्विजपटहचमरं
कमलमुखि सुभगे।
तरलतरनयने
सुविकसिततकुसुमम् ॥ १४ ॥

यस्यां[1]जौ सप्तमं रूपं
समस्ते[2]षु च पञ्चमम्।
पादेषु चामरः षष्ठः
श्लोकं तं तु विनिर्दिशेत् ॥ १५ ॥

तच्छ्लो[3]काख्यं वृत्तं यस्याजौ समपादे नियमेन सप्तमं रूपं भवति। आजिर्युद्धपर्यायः। असमेषु च पञ्चमम्। चशब्दात्सप्तममपि प्राज्ञै[4]रायोजितम्। अस्य बहुभे[5]दद्वादशमेष्विति न विरुद्धम् ॥ १५ ॥

रसपटहनूपुराणि
कमलमुखि रूपभाञ्जि।
निधनगतचारुकर्णौ
बुध[6]जनकृता तु[7] गुर्वी ॥ १६ ॥

सा बुधजनेन तु कृता गुर्वी नाम। हे कमलमुखि यस्या रूपं भजन्ते तच्छीलानि रसादीनि भवन्ति। दु(तु): पादपूरणम् ॥ १६ ॥

रवपटहौ तनु[8]सुभगे
शशिमुखि चामर[9]सरसौ।
निधनगतं सुतनु करं
त्वरितगतिर्भवति ततः ॥ १७ ॥

नूपुरशब्दौ तोमरयुक्तौ
पश्यसि कान्ते रत्नरवौ च।
यत्र सुरेभं नैधनसंस्थं
सा किल भद्रे चरूपकमाला ॥ १८ ॥

चम्पकमालायाः [10]सुरेभं देवहस्तिनं आदिलघुमिति यावत् ॥ १८ ॥

ग्रैवेयकं रत्नपता[11]कयुक्तं
पादं च मुग्धे करभोरु कान्ते।

१ यस्यादौ AB २ असमेषु Com ३ तच्छ्लूकाख्यं AB ४ रारोपितं AB ५ बहुभेदादन्येष्विति ? ६ Between 3rd and 4th lines AB add शब्दाश्चमरयुग्म ७ तु AB ८ तु सुभगे AB ९ चामर० A The text is unsatisfactory तोमर would be any पञ्चमात्र; but शाल्लु alone is wanted here. १० सुरभे B, सुरसे A
११ पन्नगशत्रुयुक्त Com

यस्यां मणिं पश्यसि राजमानं
सैरावतान्ता कथितेन्द्रवज्रा ॥ १९ ॥

इन्द्रवज्रा नाम। ग्रैवेयकमाभरणं पन्नगशत्रुर्नाम्ना[1] गरुडेन युक्तं पश्यसि। करभो[2] मणिबन्धादारभ्य[2] कनिष्ठाप्रान्तं यावत्करस्य बहिरवयव. तत्समावूरू यस्याः ॥ १९ ॥

उपेन्द्रवज्रा ध्वजरूपहारैः
सचामरैः शब्दनरेन्द्रकर्णैः।
शशाङ्कवक्त्रे सुखदा कवीनां
प्रभूतशास्त्रार्थविचक्षणानाम् ॥ २० ॥

या इन्द्रवज्रार्धसमानरूप-
मुपेन्द्रवज्रार्धमुपैति यस्याः।
मिश्रेति नाम्ना कविभिः प्रयुक्ता[3]
सैकत्रिपादेत्यपरे वदन्ति ॥ २१ ॥

सा कविभिर्मिश्रेति नाम्ना प्रयुक्ता रूपं च इन्द्रवज्रायाश्चरणेन सहोपेन्द्रवज्रायाश्चरणस्य रूपं भवति। वृत्तद्वयसाकर्यादियमुत्पद्यत इत्यर्थ.। इय मिश्रा। अन्ये[4] त्वेकत्रिपादा[5] इति वदन्ति ॥ २१ ॥

रत्ने कृत्वा चामरं चैव पश्चात्
कर्णं मुग्धे स्पर्शयुक्तं वरोरु।
भूयः कर्णं देवपीलुं च दद्याच्
छन्दस्यैका(षा) शालिनी नाम वृत्तम् ॥ २२ ॥

शालिनी नाम। देवपीलु. सुरगजः ॥ २२ ॥

आदौ रत्नं शशिमुखि सुभगे
कर्णस्तस्माद्धरतनु ललिते।
रत्नं भूयः पटहरवयुतं
हस्तश्चान्ते भ्रमरविलसितम् ॥ २३ ॥

यत्र मणिं प्रथमं तु नियुक्तं
स्पर्शरसौ[6] कटकं च रसं च।
नूपुरभावयुतं यदि कर्णं
पश्यसि भामिनि दोधकवृत्तम् ॥ २४ ॥

वैनतेयपटहौ यदि भद्रे
वीक्षसे च कटकं रवयुक्तम्।

---

१ शत्रुनामो AB २ भरतो मणिवद्धाचारस्य AB ३ प्रणीतो श्लोकं added before प्रयुक्ता AB ४ अन्या A; ५ त्वेकत्रपाद AB ६ रसौ AB

वैजयन्तिचमरं च वरोरु
स्वागतेति कवयः प्रवदन्ति ॥ २५ ॥

स्वागता नाम। स्पर्शश्च हारश्च रसश्चेति द्वन्द्वैकवद्भावः ॥ २५ ॥

मुखे तु राजा चमरो विभूषणं
रवद्वयं चारु वरोरु दृश्यते।
सपारिहार्यं च यदि ध्वजद्वयं
वदन्ति सभ्या[2]ः सुवसन्तमञ्जरीम् ॥ २६ ॥

वसन्तमञ्जरीं सभ्या[3] आर्या वदन्ति। पारिहार्यं कटकम् ॥ २६ ॥

रसनूपुरशब्दनरेन्द्ररवं
कटकं च वरोरु भवेत्तु यदा।
यदि गन्धयुगं चमरं च भवेत्
पठ तोटकवृत्तमिदं सुभगे ॥ २७ ॥

रसरवौ कटकं पुरतः सदा
करयुगं च ततः सरवो मणिः।
द्रुतविलम्बितहंसगति प्रिये
द्रुतविलम्बितवृत्तमिदं तदा ॥ २८ ॥

द्रुतविलम्बिता यासौ हंसस्य गतिः यस्याः सा प्रिया तस्या[4] आमन्त्रणम् ॥ २८ ॥

द्वे रत्ने चरणरवौ च यत्र बाले[5]
रूपं मौक्तिकसहितं ध्वजश्च मुग्धे।
अन्तस्थः सुरपति[6]र्वारणश्च मत्तस्
तद्वृत्तं किल सुभगे मयूरपिच्छम् ॥ २९ ॥

मुखे रवश्चमरविभूषितो ध्वजस्
ततो रसो वरतनु शब्दयोजितः।
विशांपतिं कुरु सुभगे सनूपुरं
सदागतिं वदति जनो ध्वजाङ्कितम् ॥ ३० ॥

विशांपतिः नृपतिः ॥ ३० ॥

पीनोन्नतस्तनभरानतगात्रयष्टे
सिंहोन्नतां प्रकथयामि तवाहमद्य।

---

१ चमरं च ? Com seems to read स्पर्शहारचमर for वैजयन्तिचमर in line 3 २ सख्या B ३ सत्या AB ४ सा प्रिया यस्यास्तस्या AB ५ वाणे AB ६ सुरपति वारणश्च AB

वृत्तं प्रिये श्रवणपार्थिवपाणियुग्मं
देवेशवारणविरामनियुक्तपादम् ॥ ३१ ॥

रसपटहपताकाचामरैरुल्लसद्भिर्
विहगपतिनिवद्धैर्निर्मलैः पद्मरागैः ।
विरचितसुरनागैर्वीक्षसे यत्र पादान्
भवति तदिह मुग्धे मालिनी नाम वृत्तम् ॥ ३२ ॥

नूपुरभावयुग्मसहितं खगं सुपटहं
रत्नसुशोभितं वरतनु क्रमेण चमरम् ।
यत्र हि वीक्षसे नरपतिं सदा शशिमुखि
हस्तविरामकं प्रमुदिता भवेत्तु सुभगे ॥ ३३ ॥

कर्णौ भावो भुजगसहितो वैनतेयः सरत्नो
वाले रूपं मरकतमथो हारमिन्दीवराक्षि ।
पादे यस्याः सुतनु नियतं दृश्यते चान्तसंस्थं
मन्दाक्रान्ता किल निगदिता पण्डितैः सा वरोरु ॥ ३४ ॥

सुरेन्द्रेभं कर्ण चरणपटहं चन्द्रवदने
प्प(प्रि)[ये पादे] यस्मिंल्ललितगमने पश्यसि पुनः ।
नियुक्तं केयूरं मरकतयुतं भावसहितं
ध्वजश्चान्ते यस्याः सुतनु कथिता सा शिखरिणी ॥ ३५ ॥

सा शिखरिणी नाम यस्याः पादे स्थाने सुरेन्द्रेभादीन्पश्यसि । इभो हस्ती । केयूरमाभरणम् । ॥ ३५ ॥

पयोधररसाङ्गदैर्वसुमतीपतिं संयुतं
वरोरु रचयत्करं सुरगजं प्रकाशं प्रिये ।
नताङ्गि सततं यथा प्रचलितामलाभध्वजं
भवेच्च पृथिवी पदैर्ललितकोमलैर्वाचकैः ॥ ३६ ॥

वसुमतीपतिः पार्थिवः । प्रचलिता अमला आभा यस्येति ध्वजविशेषणम् ॥ ३६ ॥

द्विजगणरवं रत्ने कर्णस्तथाप्यपरो मणी
रवमणि पुनर्भावो वाले तथा विनतासुतः ।

---

१ वीक्ष्यमे B २ राव AB ३ भवेत्सुभगे AB ४ कर्णो AB ५ हारिमि० AB ६ सुरेन्द्रोभादीनस्याति AB ७ भवेद् B ८ सस्येति AB ९ सुतं AB Immediately after this line both A and B give another reading for the same रवकमलभावा वाले वेगवान्विनतासुत

भवति हरिणीवृत्तं भद्रे सदा ललिताक्षरं
बुधजनकृतं नित्यं श्रव्यं मृगाङ्कनिभानने ॥ ३७ ॥

द्विजगणरत्नरावचमरं च शशाङ्कमुखि
सरसपताकभावविलसत्कटकं च भवेत्[1] ।
सुतनु विचित्रबन्धैरचितं करपल्लवकं[2]
मुनिजनसंस्तुतं प्रियतमे किल नर्कुटकम् ॥ ३८ ॥

पूर्वं माणिक्यं सुतनु कटकं रत्नमेकं सकर्णं[3]
भावं सस्पर्शं[4] ललितगमने काव्यबन्धप्रयोगे ।
कुर्यात्स्वाकारं सुतनु नियतं हस्तमेकं वरोरु
तार्क्ष्यं मञ्जीरं[5] सुरपतिगजं कीर्तिता चन्द्रलेखा ॥ ३९ ॥

चन्द्रलेखायाः तार्क्ष्यो गरुडः । मञ्जीरं नूपुरम् ॥ ३९ ॥

द्वे रत्ने चरणं मृगाक्षि रसनायुक्तं च गन्धं[6] पुनः
केयूरं सरसं ध्वजं च विमलं यस्मिन्सदा वीक्षसे ।
हारं निर्मलपद्मरागसहितं देवेश्वरस्य द्विपं
तद्विद्यात्सपताकबन्धसुभगं शार्दूलविक्रीडितम् ॥ ४० ॥

रसना मेखला ॥ ४० ॥

मुखे रूपं चैकं मणिरपि भवेत्कर्णरत्ने नियुक्ते
ततो मञ्जीरं चेद्रसनियामितं शब्दरूपे पुनर्द्वौ ।
सुरेन्द्रेभं मत्तं [प्रिय]सखि ततो वीक्षसे सत्पताकं
सुपर्णं[7] मुक्ताढ्यं विरसनियतं चन्द्रकान्तेति गीता ॥ ४१ ॥

सुरद्विर्[8]पः सुरगजः । सत्पताकमिति[9] सुरेन्द्रेभविशापणम् ॥ ४१ ॥ इतउत्तरं दीर्घसमासमपि प्रायेन(ण) विस्पष्टार्थम् ।

आदौ कर्णद्वयं स्यात्सुतनु ललितं वीक्षसे[10] रूपरत्ने
मञ्जीरं शब्दयुक्तं रसनियमितं रूपयुक्तं वरोरु ।
तस्मादैरावणं[11] [च] ध्वजमपि तथा वैनतेयं सरत्न-
मेतद्विद्याद्गुणाढ्ये बुधजनकृतं सुप्रभानाम वृत्तम् ॥ ४२ ॥

आदौ कर्णौ तु कान्ते रवमणिसहितं माणिक्यमपरं
भावस्पर्शस्वरूपं करमपि हि तथा मञ्जीरमतुलम् ।

---

१ सरसुपताक AB २ वन्धुरचित च पल्लवक AB ३ सकर्के AB ४ भाव स्वसनश्च ललित० AB ५ मञ्जरी AB ६ गन्धन्पुन AB ७ सुवर्णं AB ८ Where could this word have occurred ? ९ सन्माताक० AB १० वीक्ष्यसे AB ११ तस्मादैरावणध्वज० AB

तस्मात्कुर्यात्तु[1] मुक्तं शशिमुखि पटहं रत्नं च निधने
एतद्वृत्तस्वरूपं बुधजनदयितं ख्यातं परमकम् ॥ ४३ ॥

मुक्तादिरत्नसहितौ पयोधर[2][रसौ] तथैव[3] सुभगे
माणिक्यरूपचरणं ध्वजं च सहसा निवेश्य सरवम् ।
ग्रैवेयकं नियमितं वरोरु रचयेत्सदा सपटहं
अन्ते च नूपुरयुतं शशाङ्कवदने शशाङ्कचरितम् ॥ ४४ ॥

मुक्तायुग्मं सरत्नं मुकुटमपि भवेद्वैजयन्ती सहारा
स्पर्शो रूपं सभावं सुतनु करतलं[4] वीक्षसे पङ्कजाक्षि ।
नागानां चाप्यमित्रं पुनरपि कटकं रूपकर्णैकयोगि[5]
पादे तन्वङ्गि यस्याः प्रचरति[6] सुभगे स्रग्धरानाम वृत्तम् ॥ ४५ ॥

चामररूपयुग्मं[7]कटकं शशाङ्कवदने ध्वजं च सरवं
शब्दविभूषितं च नृपतिं समीक्ष्य दयिते पुनः सकटकम् ।
स्थापय शब्दभावचमरं च शब्दसहितं मणिं च विमलं
पन्नगयुक्त[8]मन्तचरितं वरोरु सुभगे विशुद्धचरितम् ॥ ४६ ॥

द्विजगणरत्नरूपचमरं शशाङ्कवदने विमलश्च[9] रसो
[10]नरपतिरत्नयुक्त[11]पटहो मृगाक्षि सुभगे यदि वै परतः ।
पुनरपि मेखलात्र पतिता नताङ्गि विरसे करपल्लवकौ
कविवरपन्नगेन्द्ररचिता सदा प्रियतमे हयलीलाङ्गी[12] ॥ ४७ ॥

चामरभावौ सललितगमने रत्नमतः शशिमुखि चरणश्च[13]
शब्दसमेतौ रसरवसहितौ हारमणी वरतनु कुलभद्रे[14] ।
[15]भामिनि हस्तं पुनरपि दयिते विप्रकरं यदि भवति[16] समेतं
तस्य तु रत्नं पुनरपि ललितं वृत्तमिदं वरतनु किल तन्वी ॥ ४८ ॥

चामररूपे शब्दसमेते पुनरपि वरतनु सललितचमरं
पश्यसि बाले रत्नमतो वै वरतनु शशिमुखि सुमधुरकटकम् ।
रूपसमुक्तं वै ध्वजरत्नं भवति [हि] मृदुघन[17]विपुलकुचयुगे
क्रौञ्चपदी [वै] त्रिद्विर्ज[18]युता विरचितकरतलनियमितविरमौ[19] ॥ ४९ ॥

---

१ कुर्यान्मुक्ता AB २ पयोधरौ AB ३ तवैव B ४ करतं AB ५ ०कर्णैकजोगि AB ६ स्वचरति B ७ ०युग्मं स्कटक AB, ८ पन्नगैर्युक्त० B, पन्नगे युक्त० A. ९ विमलस्वरस AB १० Before this line both A and B read वरतनुपिटिति० गुरुनिना ११ युक्तं पटहो AB १२ हयलीलागती B १३ श्रवणश्च AB १४ कुभमद्रे AB १५ मावय मानिनि AB १६ भवरि AB १७ मृदुपान० AB १८ द्विविजयुक्ता AB १९ विरामा AB

आदौ बाले मुक्तायुग्मं विकसितकुवलयनयने भवेत्तु सचामरं
पश्चात्कर्णौ मुग्धे तस्मात् सुमुकुटरसरवपटहैस्तथाप्यपरो रवः[1] ।
स्पर्शं भावं रत्नं दत्वा वरतनु शशिमुखि सुभगे मया तव कथ्यते
मुग्धे भूभृद्युक्तं देयं पुनरपि नरपतिकटकं भुजंगविजृम्भितम् ॥ ५० ॥

इति वृत्तजातिसमुच्चये कृतशिष्टशिष्टः पञ्चमो नियमः ।

[इति पञ्चमो नियमः ।]

१ रसः AB　२ रव AB　३ भूभृद्युक च [illegible] B. ४ वृत्तजातिसमुच्चये इति AB

षष्ठो नियमः।

इदानीं उक्त 'कथयामि षट् प्रत्ययांस्तथा' इति तदाह—जो(जे) पिंगलेन इति।

जे पिंगलेण भणिआ वासुइमंडव्वछंदआरेहिं[1]।
त[त्तो] थोवं वोच्छे छउओअरि छप्पआरेवि[2]॥ १॥

ये पिङ्गलेन भणिता वासुकिमाण्डव्यच्छन्दस्काराभ्याम्।
ततः स्तोकं वक्ष्यामि छातोदरि षट्प्रकारैः॥ १॥

स्पष्टम्॥ १॥

के ते षट् प्रकारा इत्याह—पत्थारा इति।

पत्थारे जे सव्वे णट्ठुद्दिट्ठं तहा अ लहुक्किरिअं।
संखं अद्धाणं विअ छउओअरि तं फुडं भणिमो॥ २॥

प्रस्तारा ये सर्वे नष्टोद्दिष्ट तथैव लघुक्रियाम्।
संख्यामध्वानं चैव छातोदरि तत्स्फुटं भणामः॥ २॥

नष्टोद्दिष्टमित्येकवद्भावः। लघुक्रिया उपलक्षणम्। गुरुक्रिया[या] अपि विधानात्॥ २॥

किमेभिः प्रत्ययैः कथितैः प्रयोजनमित्याह—उत्ताईणं इति।

उत्ताइणं मज्झे वित्ता उण थोवआ मए भणिया।
जुत्तीए पत्थारे छउओअरि तुज्झ वोच्छामि[3]॥ ३॥

उक्तादीनां मध्ये वृत्तानि पुनः स्तोकानि मया भणितानि।
युक्त्या प्रस्तारं छातोदरि तव वक्ष्याम.॥ ३॥

उक्तसंज्ञा[4] एकाक्षरस्य तदादिर्येषा तान्युक्तादीनि षड्विंशतिश्छन्दासि तेषां मध्ये मया वृत्तानि स्तोकानि महाकविप्रबन्धसुप्रसिद्धानि अभिहितानि। इदानीं तु तानि युक्त्या कथयामि येनाल्पेनैव ग्रन्थेन निःशेषव्याप्तिर्घटते॥ ३॥

आदौ तावत्तेषा नामान्याह—उत्तातह[5] इति।

उत्त[6] अतिउत्तमज्झा पइट्ठसुपइट्ठ तह य गाडत्ती।
उण्णी अणुहुभ विहई पंती तिहुजगइअडजगई॥ ४॥

सक्करि अडसक्करिया अट्ठी अडअट्ठि धिइअअइधिइऊ।
किइ पाविसमभिउप्पर किई य छव्वीस छंदाइं॥ ५॥

---

१ छप्पआरेहिं Com. २ वर्णातोऽरि AB ३ In the text vv 2 and 3 are interchanged. I have followed the order of the Com ४ उक्तसंज्ञैकाक्षरस्य AB ५ उक्ता ततोति AB ६ Something corresponding to these stanzas (which I have practically reproduced from *Kavidarpana* ch. 3) seems to have been read by the Com. But the text does not contain them

उक्तं तथात्युक्तं मध्यमसहिते प्रतिष्ठसुप्रतिष्ठे ।
गायत्र्युष्णिहौ तथानुष्टुप् बृहतीपङ्क्तित्रिष्टुप् जगत्यतिजगती ॥ ४ ॥

शक्वरी तथातिपूर्वा अष्टिः अत्यष्टिधृत्यतिधृती ।
कृतिप्रकृत्याकृतिर्विकृतिः संपर्यभिकृत्युत्कृतिसहितानि षड्विंशतिश्छन्दांसि ॥ ५ ॥

[१]एकाक्षरात्प्रभृति षड्विंशत्यक्षरं यावत् उक्तादीनि च्छन्दांसि भवन्ति । एकाक्षरस्योक्तं नाम द्व्यक्षरस्यात्युक्तं एवं यावत् षड्विंशत्यक्षरस्योत्कृतिरिति । त्रिष्टुप्जगत्यतिजगतीति समाहारद्वन्द्वः बृहत्यादिप्रकृत्यन्तस्तावत् । एवं संकृत्यादि । प्रथमं शक्वरीत्यस्यानन्तरमतिपूर्वं सैव पृथक् ॥ ५ ॥

एतेषामुद्देशपूर्वकं प्रस्तारानाह—**सूई** इति ।

सूईमेरुपडाआसमुद्दविवरीअजलहिपाआला ।
तह संवलिपत्थारो सहिओ विवरीयसंवलिणा ॥ ६ ॥

सूचिर्मेरुपताकासमुद्रविपरीतजलधिपातालाः ।
तथा शाल्मलिप्रस्तार. सहितो विपरीतशाल्मलिना ॥ ६ ॥

एतेषां यथोद्देशं लक्षणमाह—**पमुहंते** इति ।

पमुहंते एक्केक्कं तह विअ मज्झंमि एक्कमब्भहिअं ।
पमुहाओ आरहिअ वड्ढंते सव्वअंकाइं ॥ ७ ॥

प्रमुखेन्ते च एकैकं तथैव मध्य एकमभ्यधिकम् ।
प्रथमादारभ्य वर्धन्ते सर्वाङ्काः ॥ ७ ॥

सर्वस्यैव छन्दसि ऊर्ध्वक्रमेण प्रमुखे तथावदा(सा)ने एकमेकमङ्कान् स्थापयत । तथैव मध्येप्येकमेकं एककं च तत्राभ्यधिकं तदपेक्षं स्थापनीयम् । एतदुक्त भवति—वृत्तस्य यावन्त्यक्षराणि तावन्त्येवैककान्येकाधिकानि विनिवेशनीयानि । यथा त्र्यक्षरस्य चत्वारि, चतुरक्षरस्य पञ्चेति । एवं यावत् षड्विंशत्यक्षरस्य सप्तविंशतिः । पश्चात्प्रमुखादारभ्य सर्वाङ्का वर्धन्ते ॥ ७ ॥

कथमित्याह—**इक्केक्केणअ** इति ।

एक्केक्केण भइज्जइअंते उअरिट्ठिओ तह च्चेअ ।
परिवाडीए मुंचह एक्केक्कं सूइपत्थारे ॥ ८ ॥

एकैकेन[२] भज्यते उपरिस्थित तथैव ।
परिपाट्या मुञ्चै[३]कैकं सूचि[४]प्रस्तारे ॥ ८ ॥

आस्ते [?] मध्ये योङ्कः स परिपाट्या भज्य[५]ते [उपरिस्थितं च] प्रत्येकं परिपाट्या मुच्यते । यथा त्र्यक्षरस्य चतुर्ष्वैकैकेषु प्रथमेनैकैकेन मध्यमनन्तर भज्यते । तेनापि द्वितीयेन तृ[६]तीय चतुर्थं तु मु[६]च्यते । उपरिस्थितेः । एवं प्रथममेककद्विकत्रिकैककाङ्कोपलक्षिता पङ्क्तिः संपद्यते । (१,२,३,१) ।

१ Words एकाक्षरात् to यावत् are repeated between छन्दांसि and भवन्ति AB २ एकैकेनेन भिद्यते A, एकैकेन न भज्यते B ३ पचैकक AB ४ क्वचित् प्रस्तारो AB ५ भिद्यते A ६ चतुर्थतृतीयतुमुत्पद्यते AB

द्वितीये तु परिपाट्या उपरिवर्ती तृतीयो न भज्यते । तेन प्रथमेन द्वितीयस्यैव भेदो एकक[1]त्रिकत्रिकैक-काङ्कोपलक्षिता पङ्क्तिर्भवति । (१,२,२,१) । पश्चात्परिपाट्या द्वितीयमुपरिस्थितं भवति उपरिभव-स्थानद्वय(या ?)योगात् । तन्मोक्षाच्च तत्स[2]रूपैवावस्थितिः ॥ ८ ॥

एतदेव स्पष्टीकरोति—**तं पिंडिज्जउ णिउणं** इति ।

तं पिंडिज्जउ[3] निउणं जाव अ बीओवि[4] आगओ ठाणो ।

तत्पिण्ड्यतां निपुण यावद् द्वितीयमप्यागत स्थानम् ।

इति । विस्पष्टार्थमिदम् । एवं चतुरक्षरादीना गतिरमूह्या । किमिहास्मिन् सूचिप्रस्तारे सपद्यत इत्याह—**पत्थार** इति ।

पत्थारपाअगणणा लहुक्किरिआ लंभए संखा ॥ ९ ॥

प्रस्तारपातगणना लघुक्रिया लभ्यते संख्या ॥ ९ ॥

एतस्मिन् क्रियमाणे प्रथमं प्रस्तारपातगणना लभ्य[5]ते । पातन पातः । प्रस्ताराणां पातः प्रस्तारपात. । वक्ष्यमाणन्यायेन अन्येपामप्यन्तःप्रवेश इत्यर्थः । ‘एकम्मिवि पत्थारे पत्थारा [बहुअरा] विणिद्दिट्ठा’ (६ १७) इति प्रस्तारपातगणना लभ्[5]यते । यथा सर्वत्रैव तावत्प्रथमे गुणने क्रियमाणे उपरिष्टात्फल भवति । यथा त्र्यक्षरस्य चतुष्कमिति तत्प्रमाणात्प्रस्तारपातगणना[8] वाच्या । यथा त्र्यक्षरस्य स्वेन सह प्रस्तारत्रयमापतति इति । तथा चतुरक्षरस्य चत्वार इति । एव पञ्चाक्षराणा पञ्चप्रभृतय. उदाहार्या । एतत्स[6]मुद्रप्रस्तारे प्रकटीकुन स्वयमेव । पश्चाल्लघुक्रिया लभ्यते एकलघ्वादीनां वृत्ताना निश्चय इत्यर्थ । यथा किय[7]न्ति त्रिलँघूनि वृत्तान्यस्मिन्संभवन्तीति चिन्ताया तस्मात्परिच्छेदः क्रियते यथैव(क) त्रिलघ्विति । एव द्वितीयाद् द्विलघुनिश्चयो यथा त्रीणि द्विलघूनीति । तद्वत्तृतीयादेक-लघुनिर्णयश्च यथा त्रीण्येवैकलघूनीति । चतुर्थादारम्य [एव]मेव प्रतिलोम(ग)त्या त्रिगुर्वादीना कार्यम् । चतुरक्षरादीना चानयैव दिशा गतिरूह्या । अन्यच्चास्मिन्सूचिप्रस्तारे क्रियमाणे सख्या लभ्यते । सर्वेपामेवैकत्र योजिताना गणनात् । तथा चोक्तमन्यै .—“एष्वेव पिण्डितेपु [च] सख्या प्रस्तार[9]विर-चिता भवति” (जयदेव. ८ ११) तेन त्र्यक्षरस्याष्टौ प्रभेदाः कथनीया. चतुरक्षरस्य च षोडश इति । यस्मात् त्र्यक्षरस्य एकक-त्रिक[त्रिक]एककाना एक[10]त्र गणनादष्ट एवोत्पद्यन्ते ॥ ९ ॥

क्रमेण प्राप्त मेरुप्रस्तारमाह—**इह कोट्ठआणं** इति ।

इ[11]ह कोट्ठआण दोण्हं वड्ढइ हेट्ठट्ठिअं कमेणेअं[12] ।
प[13]मुहंते एक्केक्कं तदो अ दो तिण्णि चत्तारि ॥ १० ॥

इह कोष्ठकयोर्द्वयोर्वर्धते अध.स्थित क्रमेणैव ।
प्रमुखा[14]न्ते एकैक ततश्च द्वौ त्रयश्चत्वारः ॥ १० ॥

---

१ एककद्विकैक चोपलक्षिता AB २ तत्स्वरूपावस्थाया स्थिति AB ३ पिंटज्जइ AB ४ बीओइ AB ५ Words from लभ्यते to गणना (both inclusive) are dropped in A ६ समन AB ७ कियतत्र लघूनि AB ८ गुनाना AB ९ प्रस्तारविचारिता AB १० एकत्रिगुणाना दष्टा AB ११ इअ AB १२ हट्ठट्ठिअ कमेण अ AB १३ दहुमुहते AB १४ प्रमुखान्तरकैक A, प्रमुखान्तरेकैकं R

इहास्मिंश्छन्दसि द्वयोः कोष्ठकयोः स्थापितयोः पङ्क्तिक्रमेण पश्चादवस्थितानां पङ्क्तीना क्रमेणैककमेकं वर्धते यावत् षड्विंशतितम सप्तविंशतिः । कोष्ठकालीं स्थापयित्वा किंकर्तव्य[1]मित्याह—**पमुहंते** इति । प्रमुखान्त एकैक ततश्च द्वे त्रीणि चत्वारि । सर्वस्य एव कोष्ठकपङ्क्तेरादौ तथावसाने एकैकमेकैकं विनिवेश्य ततो द्वित्रिचतुःप्रभृतीनि स्थापनीयानि ॥ १० ॥

कथमित्याह—**उपरिट्ठिअ** इति ।

उअरिट्ठिअअंकेणं वड्ढइ हिट्ठट्ठिअं कमेणेअ ।

उपरिस्थिताङ्केन वर्धतेऽधः[2]स्थित क्रमेणैव ।

प्रत्येकं कोष्ठकस्याधः[3]स्थितस्य उपरि द्वौ कोष्ठकौ भवतः । तयोर्मिश्रीकृतयोर्यत्परिमाणं भवति तेनावस्थितेन क्रमेण पठ्यते । यथा प्रथमकोष्ठकद्वयस्याधः संस्थाप्यते तत्कोष्ठकत्रयम् । तस्य प्रथमे तावदेकं स्थितमेव । द्वितीय तु उपरिस्थितकोष्ठकाङ्कद्वयमिश्रणाद्यत्परिमाणमुत्पद्यते द्विकं तद्विनिवेशनीयम् । तृतीये त्वेकक स्थितमेव । एव द्वितीया पङ्क्तिः एककद्विकै[क]कोपलक्षिता सपद्यते ।

उदाहरणं

1 1
1 2 1

। अनन्तर द्वि(तृ)तीयस्या पङ्क्तौ यानि चत्वारि कोष्ठकानि तेषामाद्यन्तयोस्तावदेकक स्थितमेव । द्वितीयकोष्ठके उपरिभवकोष्ठकद्वयाङ्कात्परिमाणमेक द्वौ चेति तृ(त्रि)कं स्थापनीयम् । तृतीये तथैव । चतुर्थे त्वेककस्यैव स्थितिः । एव तत्र एकक[त्रिक]त्रिकैककोपलक्षिता पङ्क्तिर्जायते । उदाहरणं

१ १
१ २ १
१ ३ ३ १

। पश्चाच्चतुर्थे पङ्क्तिभागे पञ्चकोष्ठके तावदाद्यन्तयोर्निर्विवादमेक एव[4] । द्वितीये तूपरिष्ठात्कोष्ठकद्वयान्मिश्रीकृत्य चतुष्कं स्थापनीयम् । तृतीये तथैवोपरिष्ठात्षट्कमिति । चतुर्थतः चतुष्कं पञ्चमे त्वविवादः । एवं चतुर्थी पङ्क्तिरेकचतुष्क[षट्क चतुष्क]एककोपलक्षिता भवति । उदाहरणं

१ १
१ २ १
१ ३ ३ १
१ ४ ६ ४ १

।

एवं सर्वत्र कर्तव्यं यावत् षड्विंश[तित]मी पङ्क्तिरायातेति । तदा चैवमेकाकारे पङ्क्तिसमूहे स्थिते किं भवतीत्युच्यते—**मेरुम्मि** इति ।

मेरुम्मि होइ[5] गणणा सूईए[6] एस अणुहरइ ॥ ११ ॥

मेरौ[7] भवति गणना[8] सूच्या एष अनुहरति ॥ ११ ॥

अस्मिन्मेरौ क्रियमाणे गणना[9] भवति प्रत्येकश' साकल्येन च सर्वच्छन्दसाम् । गणना रूप-

---

१ किं कर्तव्यतामित्याह AB २ वर्धतेवस्थित AB ३ ध्वनितस्य AB ४ धातावदान्यतोर्निर्विवादक एव AB
५ मेरु सिहाइअ A, मेरुसिहोइ अ B ६ सूइए AB ७ मेरौस्त भवति AB ८ गणनास्या एप AB ९ गणगणा AB

लक्षण तेन प्रस्तारपातगणना लभ्यत एव। यस्मात्सूच्या एषोऽनुहरति सादृश्यं भजते। सूचीना हि समुदायो मेरु. तेन सूच्यास्त्वैकत्य छन्दसो लघुक्रियादयो लभ्यन्ते मेरोस्तु सर्वेषामपि। न केवलं प्रस्तारपातगणनादि परीक्षा तु (च?) निवेश्य सर्वकोष्ठकेषु कार्या ॥ ११ ॥

अनयोरेव मन्दमतिबोधनार्थमाह—सागर इति।

साअरवण्णे अंकों दोच्चिअ[1] गरुआ अ मज्झिमट्ठाणे।
समरे उण एक्कोच्चिअ मेरुम्मि तहेव सूईए[2][3] ॥ १२ ॥

सागरवर्णेऽङ्कौ द्वावेव गुरू मध्यमस्थाने।
समरे पुनरेक एव मेरौ तथैव सूच्याम् ॥ १२ ॥

सागरवर्णे विषमाक्षरे छन्दसि द्वावङ्कौ गुरू सपद्येते प्रस्तारद्वयेपि। यथा त्र्यक्षरे द्वौ त्रिकौ पञ्चाक्षरे द्वौ दशकाविति। समरे समाक्षरे पुनः एक एव यथा द्व्यक्षरे द्वौ चतुरक्षरे षडिति ॥ १२ ॥

पताकामाह—मणिरव इति।

मणिरवमालाआरो विउणेविउणेहि[4] वड्ढिओ[5] कमसो।
ठइअव्वो पत्थारो णिहणद्धमणीरवद्धो य ॥ १३ ॥

मणिरवमालाकारो द्विगुणद्विगुणैर्वर्धितः[6] क्रमशः।
स्थापयितव्य. प्रस्तारो निधनार्धमणीरवार्धश्च[7] ॥ १३ ॥

प्रस्तार' स्थापयितव्य। किंभूतः मणिरवैर्गुरुलघुभिरूर्ध्वक्रमेण मालाकारः स्रगाकृतिः। यथा हि माला सितासितादिभि' कुसुमैर्बध्यते तद्वदस्मिन्प्रस्तारेऽपि प्रथम गुरु पश्चाल्लघु पुनर्गुरुः पुनरपि लघुरिति विनिवेश्य। किंभूत। क्रमश. परिपाट्या द्विगुणद्विगुणैर्वर्धित. द्विगुणीकृत्य वर्धयेदित्यर्थः। ल्यप्(ल्यब्)लोपेत्र पञ्चमी। यथा यथा क्रमेणाक्षराणा वृद्धिर्भवति उक्तात्युक्तमित्यादि मध्यमादिवशात्तथा तथा तस्माद् द्विगुणीकृताद्गुरूणा लघूना चाग्रे द्विगुणा[8] द्विगुणा वृद्धिः कार्या। यथा प्रथममेकाक्षरे एको गुरुरेकश्च लघुरिति प्रस्तारे स्थिते द्व्यक्षरावसरे तदेव द्विगुणीकार्यं यथा गुरुर्लघुरिति भवति। पश्चात् तस्माद् द्विगुणैरेव तदपेक्ष वर्धनीयम्। यथाग्रे द्वौ गुरू द्वौ लघू च सपद्येते। उदा० SS, IS, SI, II। अनन्तरं त्र्यक्षरप्रसगे द्व्यक्षर द्विगुणीकार्यम् अष्टकश्चः स्थापनीयम्। तस्माच्च गुरुलघूनां तद्वद् द्विर्गुणा स्थिति' कार्या। यतोऽग्रे गुरुचतुष्क लघुचतुष्क भवति। उदाहरणं SSS, ISS, SIS, IIS, SSI, ISI, SII, III। एवं द्विगुणीकृतान् द्विगुणीकृतान् प्रस्तारान् कृत्वा द्विगुणद्विगुणवृद्धया च गुरुलघूना सर्वेषु छन्द सु[9] क्रमेण स्थितिरभ्यूह्या। एतदेव स्पष्टीक्रियते। निर्धनार्धमणी रवार्धश्चेति। निधनेऽन्ते अर्धानि मणयो गुरवो यस्य तथा निर्धनं[10] एवार्धानि[11] रवाणि यस्य स तथा। सर्वस्यैव छन्दसि पूर्वक्रमेण मालाकारस्य स्थापितस्यान्तेऽर्धानि गुरवो भवन्ति अर्धानि[12] च लघव एव इत्यर्थ. ॥ १३ ॥

---

१ लगा A, झगा B २ दोवि गरुआ अ मज्झिमट्ठाए AB ३ नगम्मि तहा सूईअ AB ४ हिविसोणेसु वड्ढिओ AB ५ पनसो अ AB ६ द्विगुणत्रिगुणैर्वर्धितक्रमस. AB ७ रवधश्च AB ८ त्रिगुणा AB ९ सुक्रमेण repeated immediately AB १० विधानवत्तवारर्धावश्रेनि AB ११ विधनेरवार्धाणि AB १२ अपाणि चल एव इत्यर्थ AB

अस्यैव विशेषान्तरमाह—**बीअद्धेसु** इति ।

बीअद्धेसु कहिंचिअ दिज्जइ फरिसोवि अंतिमो छउए ।
तेणेअं पत्थारे वित्ताणं कीरए गणणा ॥ १४ ॥

द्वितीयार्धेषु क्वापि दीयते स्पर्शोऽप्यन्तिमश्छाते ।
तेनेयं प्रस्तारे वृत्तानां क्रियते गणना ॥ १४ ॥

पताकाप्रस्ताराणा यानि द्वितीयार्धानि भवन्ति तेषां क्वचित्स्पर्शोऽप्यन्तिमो दीयते । यथा त्र्यक्षरस्याष्टप्रभेदस्यान्ते चत्वारो लघवो यथा च षोडशप्रभेदस्य चतुरक्षरस्यान्तेऽष्टाविति । क्वचित्स्पर्शोऽपीति भङ्ग्या विपरीतपताकां दर्शयति । तेन क्वचिद्द्वितीयार्धेषु गुरवोऽपि दीयन्त एव । तत्र विपरीतैः[1] रत्नमणिमालाकारः प्रस्तारः कार्यो यथा प्रथमे आदौ गुरूणां स्थितिस्तद्वदिह लघूना कार्येत्यर्थः । एवं[2] किं संपद्यत इत्युक्त तेन प्रयोगेणास्मिन्प्रस्तारे वृत्ताना[3] गणना क्रियते । तेनेहापि सहार्थे तृतीया । एतदुक्त भवति । लक्षे(क्ष्ये)ण विना [न] लक्षणगतिर्निर्मला भवति यतः शिष्याणामत. पताकाप्रस्तारेण सह या गणना संख्या क्रियते सातिनिर्मला भवति लक्ष्यैलक्षणयुक्ता[4] ॥ १४ ॥

समुद्रमाह—**रअणा** इति ।

रअणाइं जहिच्छाइ ट्ठविउं मुद्धे[5] ठवेह पत्थारं ।
ताव अ पिंडेअ [फुडं] फरिसाँ[6] सव्वे ठिआँ जाव ॥ १५ ॥

रत्नानि यथेच्छया स्थापयित्वा[7] मुग्धे स्थापय प्रस्तारम् ।
तावच्च पिण्डय स्फुट स्पर्शाः सर्वे स्थिता यावत् ॥ १५ ॥

अत्र व्यवहितपदसंगतिः । हे मुग्धे प्रस्तारं स्थापयेति । तावच्च त स्फुटं पिण्डय यावत् सर्वेलघुर्न्यायान्ति[8] इति ॥ १५ ॥

सूत्रमात्रमेमत् । अस्यैव प्रपञ्चार्थमाह—**पढम** इति ।

पढमचमरस्स हिट्ठे फरिसं[9] पुरओ जहाक्कमेणेअ ।
मग्गे जे परिसिट्ठा कडएहिं तेहिं पूरेहि ॥ १६ ॥

प्रथमचमरस्याध.[10] स्पर्शः पुरतो यथाक्रमेणैव ।
मार्गे ये परिशिष्टाः कटकैस्तान् पूरय ॥ १६ ॥

रत्नानि प्रथमं स्थापयित्वा कस्यचिच्छन्दसि पङ्क्तिक्रमेणानन्तर तेषा यः प्रथमश्चमरो[11] गुरुस्तस्याधः स्पर्शो लघो(घु)र्विधेयः । तस्य पुरतोऽग्रे यथाक्रमेणैव प्रस्तारो विधेयः । यथैवोपरिपङ्क्तेर्गुरूणा लघूनामवस्थितिर्भवति तद्वदधो विनिवेशनीय इत्यर्थः । किंच । मार्गे पश्चाद्भागे ये परिशिष्टा[12] वर्णा-

१ विपरीतरवि० AB २ एवेक सपद्यते AB ३ प्रवृत्ताना AB ४ लक्षणक्षणयुक्ता AB ५ मुद्धेद्धे AB ६ फुरिसा सव्वट्ठिआ AB ७ स्थापितं तु AB ८ सर्वेलघुनायात इति AB ९ फुरिस AB १० चरमस्याधस्यस AB. ११ श्चगुरुर्गुरु. AB. १२ परिशिष्या AB

त्वात् कटकैर्गुरुभि पूरय। यथा त्र्यक्षरस्य तृतीयपञ्चमसप्तमप्रभेदेषु प्रथमस्य गुरुत्रयरूपस्याध-स्तावोऽसौ द्वितीय प्रथमलघु. प्रभेदः 'पढमचमरस्स हिट्ठे'त्यादिना परिकल्पितः. तस्याधस्तृतीये प्रभेदे द्वितीये प्रथमगुरोरधस्ताल्लघौ कृते तत्यानन्तर पुन 'जहाकमेणे'ति गुरौ विनिवेशिते त्र्यक्षरता संपद्यते। तदर्थमेतदुक्त 'मग्गे जे परिसिट्ठा' इति। तेनास्मिन् तृतीये द्वितीये तृतीये लघुगुरू स्थापयित्वा य. प्रथमोऽक्षर शिष्यते तत्र कटि(ट)को गुरु कर्तव्यः। एवं मध्यलघुप्रभेद आयाति. । पञ्चमेऽप्येव चतुर्थ-प्रभेदान्त्यस्य गुरोरध परिकल्पितो यो लघुस्तस्य मार्गे यदक्षरद्वयं शिष्यते तत्र गुरुद्वयं स्थापनीयम्। अनेनान्तलघुप्रभेदो भवति॥ उदाहरणम्—SSS, ISS, SIS, IIS, SSI, ISI, SII, III ॥ १६ ॥

किंच—

एकम्मिवि पत्थारे पत्थारा वहुअँरा विणिद्दिट्ठाँ।
मग्गट्ठिआ वि तँत्थवि छउओअरि तुज्झ वोच्छामि ॥ १७ ॥

एकस्मिन्नपि प्रस्तारे प्रस्तारा बहुतरा विनिर्दिष्टा।
मार्गस्थितास्तत्रापि छातोदरि तानहं वक्ष्यामि ॥ १७ ॥

अस्मिन्समुद्रप्रस्तारे एकस्मिन्नपि बहुतरा प्रस्तारा विनिविष्टा ताश्च मार्गेऽध्वनि स्थितान् कथयामि ॥ १७ ॥

तानाह—अट्ठक्खर इति।

अट्ठक्खरपत्थारे उत्ताईओ हुअंति सव्वे अ।
विह[ई]छंदंमि तहा पत्थारो नवविहो होइ ॥ १८ ॥

एए सव्वे छंदा उक्किइछंदंमि होन्ति पत्थारे।
मइ भणिआ जुत्तीए लक्खिज्जं तुहा पअत्तेण ॥ १९ ॥

अष्टाक्षरप्रस्तारे उक्ताद्यो भवन्ति सर्वाण्येव।
बृहतीच्छन्दसि तथा प्रस्तारो नवविधो भवति ॥ १८ ॥

एतानि सर्वाणि च्छन्दांस्युत्कृतिच्छन्दसि भवन्ति प्रस्तारे।
मया भणितानि युक्त्या लक्षय त्वं प्रयत्नेन ॥ १९ ॥

अष्टाक्षरे एकाक्षरादय सर्वे एवान्तर्भवन्ति। एतच्च पताकाया दर्शितं ध्रुवम्। एव बृहत्या नवविधस्य प्रस्तारस्यान्तर्भावोऽवसेय.। तयोक्तौ सर्वेषामेवेति मया भणितानि युक्त्या। सा च युक्तिर्मदीया पताका[या]मेव दर्शिता। त्व तु प्रयत्नेनाभियोगेन लक्षय जानीहि ॥ १८–१९॥

इदानीं निर्देशद्वारा मात्रानामाह—एसोच्चिअ इति।

---

१ गुरुत्रयरूपस्य० AB २ हट्ठ AB ३ परिकल्पितस्याधस्तृतीये AB ४ प्रथमगुरव० AB ५ जहाकमेणेति AB ६ मध्यलघु: AB ७ बहुअरा विणिद्दिट्ठा AB ८ तहावि Com. ९ स्थिताथा AB १० लक्खिज्जउ तं पअत्तेण Com ११ मन्दा A, मन्दा B १२ निद्देसद्दारो AB

एसोच्चिअ[1] पत्थारो मत्ताविंत्ताण साहिओ किंतु[2] ।
मत्ता जत्थ ण पूरइ फरिसं पढमं तहिं देहि ॥ २० ॥

एष एव प्रस्तारो मात्रावृत्तानां सावितः किंतु ।
मात्रा यत्र न पूर्यते[3] प्रथमं स्पर्शं तत्र देहि ॥ २० ॥

य एव वर्णवृत्तानां 'रअणाणि जहिच्छाए' (६·१५) इत्यादिना प्रस्तारोऽभिहितः स एव मात्रावृत्तानां भवति । इयांस्तु विशेषो यस्मिन्समुदाये मात्रा न पूर्यते तत्रैव प्रथम स्पर्शं लघ्वक्षरं देहि । नान्यस्मिन् । मात्रा परिमाणम् । सा कदाचिन्न्यूनत्वेन पूर्यते कदाचिदाधिक्येन । तेन द्वयमपि परिहर्तुं प्रथमः स्पर्शो दीयते । यत्रैव[5] न पूर्यते तत्र दीय[त] इति वचनाद्गाथायाः पञ्चमे प्रभेदे द्वितीयांशे प्रथमचर्मरस्याधः[6] स्पर्शे कृते पुरतश्च गुरुषु स्थापितेषु मार्गे प्रथमगणस्थाने गुरुद्वय कृत्वा मात्रापूरणस्पर्शो यदि वा गाथापेक्षया प्रथमो दीयते तत्र प्रथमः पञ्चमात्रो द्वितीयश्च त्रिमात्र आयातीति दोषः परिहृतः । यस्माद्गाथादीनि केवलमात्रावृत्तानि न भवन्ति तेषां दोष एव नास्ति । अंशकवृत्ताना तु यस्मिन्नेवांशके मात्रा न पूर्यते तस्मिन्नेव प्रथमे लादौ कृते दोषस्यावसर एव नास्ति । मात्रावृत्तप्रस्तारे यथा चतुर्मात्र एव प्रथम गुरुद्वये कृते द्वितीयस्य प्रभेदस्य प्रथम लघु कृत्वानन्तरं पुरतो गुरौ कृते त्रिर्मात्रप्रसगान्मात्राया न पूरणमतः स्पर्शे कृते द्वितीयचतुर्मात्रोऽनन्तर तृतीये द्वितीयगणान्त्यस्य गुरोरधो लघौ कृते मात्रापरिपूरणार्थं कटके च विहिते त्रिमात्रस्यैवासरः । तत्परिपूरणाय यदि गुरुर्दीयते तत्पञ्चमात्रप्रसगादपूरणमेव मात्रायाः । तेन तत्रापि[10] पूरणार्थे लघुरेव कार्यः । एव तत्र मध्यगुरुरायाति । अनेनैवादिगुरुसर्वलघू योज्यौ ॥ २० ॥

एव सति यत्र मध्यगुरोः प्रतिषेधः तत्र का गतिरित्युच्यते—**गाहा** इति ।

गाहाविसमगणाणं हेट्ठा अंतचमरस्स दे छउए ।
मत्तापूरणफरिसं मज्झगअं पढमभणिअंमि ॥ २१ ॥

गाथाविषमगणानामधोऽन्तचमरस्य देहि छाते ।
मात्रापूरणस्पर्शं[11] मध्यगत प्रथमभणितमपि ॥ २१ ॥

यद्युक्तं स्पर्शं तत्र प्रथमं देहीति तथापि गाथाना ये विषमगणास्तेषा[12] प्रसगे योसौ द्वितीयोन्तगुरुस्तस्याधः[13] लघु विनिवेश्य शेषमात्राद्वय गुरुणा पूरयित्वा मात्रैका शिष्यते । तदर्थं प्रथम प्राप्तमपि लघु मध्ये देय गुरोर्लघोश्चान्तराल इत्यर्थः । तेनादिगुरोरवस्थानान्मध्यगुरोर्गतिर्विच्छिन्ना[14] भवति ॥ २१ ॥

एतदेवोक्तम्—

एवं णरिंदरहिए विसमगणे कुणह गाहाण ।

---

१ एक्कोच्चिअ AB २ किंओ AB ३ Both A & B add तत्रैव after पूर्यते. ४ रअणाउ जहिच्छाये AB ५ नत्रैव AB ६ चरमस्याध AB ७ परिवृत AB ८ द्विस्त्रिमात्र० B, द्विमात्र० A ९ Both A & B repeat the words पूरणाय to प्रसगाद० immediately after the latter word १० दत्तापि AB ११ मात्रापूरणस्यार्थे AB १२ विषमगणानस्तेषा AB १३ Both A and B add सतीगणावलाना before लघु १४ रिच्छेर्नो AB

लहुआणं वण्णाणं आणअणे तहव्वि(वि)अ गुरूणं ॥ २८ ॥

लघूनां वर्णानामानयने तथैव गुरूणाम् ॥ २८ ॥

लघ्वादीनामानयने यथा त्रयो लघवस्त्रिंशद्वर्णाः सप्तविंशतिर्गुरव इति प्रथमस्याम्। एव द्वितियस्यामधो (?) द्वितीयस्थानात् यथा पञ्च लघवो वर्णा एकत्रिंशत् षड्विंशतिश्च गुरव इति। तृतीयस्या तृतीयात्स्थानात् यथा सप्त लघवो वर्णा द्वात्रिंशत् पञ्चविंशतिश्च गुरव इति। एव सर्वत्र कर्तव्यम्। उदाहरणम्—३, ३०, २७। ५, ३१, २६। ७, ३२, २५। गाथा[ना]मित्युपलक्षण प्राधान्यात्। तेन स्कन्धकादीनामयमेवोपायः। स्कन्धके यथा प्रथम चत्वारो द्वितीय चतुस्त्रिंशत् तृतीये त्रिंशत्। अत्रैव तथापि तथैव वृद्धिर्हानी। न केवल स्कन्धादीना यावत्सुमन प्रभृतीना द्विपदीनामप्यन्येषा च। यथा सुमनस प्रथममष्टौ ततो द्वात्रिंशच्चतुर्विंशति[श्चेति] स्थानत्रये स्थापिते तथैव वृद्धिक्षयौ विधेयौ। अत्र तावत्समर्प्यते यावच्चत्वारोन्ते शिष्यन्ते। एव सति प्रथमभेदेऽष्टौ लघवो वर्णा द्वात्रिंशत् चतुर्विंशतिश्च गुरव इति कथ्यन्ते ॥ २८ ॥

तस्मात्प्रत्येक पाते(?) [ती]पंणासं इति।

तीपण्णासं पंचावण्णा दोच्चिअ कमेण ठविऊण।
दोहाणि एक्कवड्ढी एक्केक्कं हीरए तहा सज्झे।
विवरीअसंवलीए होइ विहाणं इमं छुउए ॥ २९ ॥

त्रिपञ्चाशत्पञ्चपञ्चाशत् द्वौ चैव क्रमेण स्थापयित्वा।
द्विहानि[रेक]वृद्धिरेकैक ह्रियते तथा [मध्ये]।
विपरीतशाल्मलेर्भवति विधानमिद छाते ॥ २९ ॥

हे छाते तन्वि प्रथमे त्रिपञ्चाशत् द्वितीये पञ्चपञ्चाशत तृतीये च द्वौ इति क्रमेण स्थापयित्वा तथैव क्रमेण द्वाभ्यामेकेन च हानिर्योज्या। एकेन च तृतीये वृद्धि। एव तावत्कार्यं यावच्छाल्मलिप्रभेदो नाम। अत्रापि स्कन्धकादीना अय कर्तव्य ॥ २९ ॥

नष्टोदिष्टमाह—**एत्तिअमित्ते** इति।

एत्तिअमेत्ते अंके कअरो वेत्तित्ति णट्ठअं होइ।
एअं जाणह वित्तं कअम्मि ठाणम्मि उद्दिट्ठं ॥ ३० ॥

एतावत्यङ्के कतरद्वृत्तमिति नष्ट भवति।
तज्जानीहि वृत्त कतमे स्थान इत्युद्दिष्टम् ॥ ३० ॥

प्रथमैकादिकेऽङ्के स्थापिते यत्कश्चित्पृच्छत्येतावत्यङ्के सति कतरद्वृत्त भवति कीदृक्स्वरूप गुरुलघुरिति नष्टसामान्यलक्षणम्। यच्च वृत्त प्रस्तीर्य कश्चित्पृच्छति एतद्वृत्त जानीहि तावत्कतमे स्थाने द्वितीय आहोस्वित्तृतीय उत्तान्यस्मिन्क्वचिदित्युद्दिष्टलक्षणम् ॥ ३० ॥

१ बहूना AB २ प्रथम स्यात् AB ३ चक्षरो AB ४ वृद्धहारी AB ५ सिष्टते AB ६ स्थापयेत् द्वौदेवक्रमेणानेन AB ७ शाल्मरे प्रथम प्रभेदो नाम ? ८ मतष्कर्तव्य AB ९ एत्तेअमेत्ते AB १० कथमेव AB

अनयोर्विस्तारमाह—**विसमंकेसु** इति ।

विसमंकेसु अ चमरं समेसु फरिसं ठवेह वित्ताणं ।
अद्धद्धं ओसक्कइ णट्ठंके सव्वकडआइं ॥ ३१ ॥

जत्थ अ ण देइ भाअं एक्कं दाऊण तत्थ पिंडेह ।
भाए दिण्णे अ फुडं मयच्छि णट्ठं विआणेहि ॥ ३२ ॥

विषमाङ्केषु च चामरं समेषु स्पर्शं स्थापय वृत्तानाम् ।
अर्धमर्धमवष्वष्कते नष्टाङ्के सर्वकटकानि ॥ ३१ ॥

यत्र च न ददाति भागमेक दत्वा तत्र पिण्डय ।
भागे दत्ते च स्फुट मृगाक्षि नष्टं विजानीहि ॥ ३२ ॥

यमेवाङ्कमुद्दिश्य प्रष्टा पृच्छति स यदि विषमो भवति तदार्धमसमर्प्य चँमर[3] स्थापय । समश्चेत्त-स्यार्धोपसर्पणे स्पर्शमिति । नष्टाङ्के सति सर्वकटकानि सर्वे गुरवः स्थाप्यन्ते । नष्टत्वमङ्कस्य एकक-प्राप्ति. । नर्नु च विषमाङ्कात्कथमर्धलाभः । एतदर्थेनैवोक्तं यत्र प्राक्रियमाणं भाग न प्रयच्छति विषमाङ्के त्रिपञ्चसप्तादिस्तत्रैक दत्वार्धापहारो विधेयः ॥ ३१ ॥ ३२ ॥

कियँदवष्यन्ते क्रियत इत्याह—**अद्धद्धं** इति ।

अद्धद्धं ओसक्कइ वहुसो वाहाइ जाव अ समत्तं ।
जं[6] णिहणे तं[6] वित्तं णट्ठंमि अ पँच्चअं एयं ॥ ३३ ॥

अर्धमर्धमवर्ष्वष्कते बहुगो भांगा [यावच्च समाप्तम् ।
यन्निधने तद्वृत्तं नष्टे च प्रत्यय एषः] ॥ ३३ ॥

यावत्तद्वृत्तं समाप्तमिति । तास्मिन्समाप्ते यन्निधनेऽन्ते रूप दृश्यते तद्वृत्त दर्शनीयम् । इत्येत-न्नष्टाङ्के प्रत्ययमिति यथा—षडक्षरस्य सप्तमः प्रभेद. कीदृश इति प्रश्ने तदेव स्थापनीयम् । पश्चात् 'जत्थ अ ण देइ भाअ' इति सैकं[10] कृत्वा अँर्धं[11] चापहृत्य 'विसमंकेसु' इति स्थानिवद्भावाद्गुरुर्निवेश्य । अनन्तर तदर्धस्य चतुष्कस्यार्धे हृते 'समेसु फरिसं' इति लघु दत्वा पश्चात्तस्याप्यर्धे[12] हृते लघोः एव स्थापनम् । एवमक्षरत्रय आदिगुरवोयेते (?) । तच्छिष्टमेकक तदेवार्धग्रहणाय सैकं कृत्वार्धं च गृहीत्वा गुरुमेव स्थापयेत् । एव चतुर्थमक्षर लघु लब्ध भवति । पुनरपि तस्य सैकँकरणार्धापहाराभ्या[13] गुर्व-क्षरस्यैव लाभः पञ्चमस्य । षष्ठस्य गुरोस्तथैव कर्तव्यमत एवोक्तम्—'अद्धद्ध ओसक्कइ वहुँसो[14] वाहाँइ[15] जाव अ समत्त' इति । एव गुरु-लघुद्वय-गुरुत्रयरूप षडक्षरस्य सप्तम दर्शयेत् । उदा० SII SSS ॥ ३३ ॥

उद्दिष्टमाह—**अंतं फरिसं**[15] इति ।

---

१ मपष्ठकाते AB २ द्वादश AB ३ दंमन AB ४ गरूटे च AB ५ कियदववध्यन्ते A; कियदववध्येत B ६ जाणहणित्त AB ७ पच्चमअ AB ८ अट्टकृते AB ९ वाना AB १० मैक AB ११ सं A १२ तदस्माप्यरे ह्यते B, तदस्यापरे हृते A १३ स्यैककरणापापहाराभ्या AB १४ वहुलो वारा AB १५ हरिदाउ AB

एव नरेन्द्रहितान्विषमगणान्कुरु गाथाया. ।

अत्र गाथा उपलक्षणम् । किंच—

पढमलहू पत्थारो ठविअव्वो विसमसत्ताण ॥ २२ ॥

प्रथमलघुः प्रस्तार. स्थापयितव्यो विषमसमात्राणाम् ॥ २२ ॥

तिस्र पञ्च सप्ताद्या विषमास्तासा प्रस्तार प्रथमलघु स्थापयितव्य एतत्प्राय पूर्वमेव स्थापित 'मत्ता जत्थ ण पूरइ' (६ २०) इत्यादिना तथापि विस्पष्टार्थ पुनरुक्तम् ॥ २२ ॥

विपरीतसमुद्रमाह—**पढम** इति ।

पढमरवाहो चमरं उअरि अ पुरओ जहाक्कमेणंपि ।
मग्गट्ठिआवि फरिसा विवरीअं जाण सलिलणिहिम् ॥ २३ ॥

प्रथमरवाधश्चमरमुपरि च पुरतो यथाक्रमेणैव ।
मार्गस्थिताश्च स्पर्शा विपरीतं जानीहि सलिलनिधिम् ॥ २३ ॥

यथैव समुद्रप्रस्तारे गुरूणा प्रथम स्थितिस्तद्वदिह लघूना कार्या । किं च । मार्गे पश्चाद्भावे स्थिताः स्पर्शा· कर्तव्या. । यथा समुद्रे चतुरथ एवं भूभरणोपवृहित (?) विपरीत सलिलनिधिं समुद्र जानीहि । यथा त्र्यक्षरे प्रथमं लघुत्रय स्थापनीयम् । पश्चाद्द्वितीये प्रथमपादवच्चामर कार्यम् । पुरतश्च यथाक्रमेणैव लघुद्वये विहिते द्वितीयस्य आदिगुरु. प्रभेदो भवति योऽसौ समुद्रे सप्तम' । अनन्तर तृतीये प्रभेदे उपरिस्थितद्वितीयलघ्वक्षरस्याध स्थापिते गुरौ पुनश्च यथाक्रमेणैव विनिवेशिते लघौ य आद्यो वर्णः शिष्यते मार्गे तत्र स्पर्श· कार्य । एवं सर्वत्रेति विपरीतसमुद्रप्रस्तारः ॥ २३ ॥

पातालमाह—

संखं ठवेह पढमं पाअंकेणावि गुणह तं हेट्ठे ।
तत्थवि अद्धं घेत्तुं तिहि ठाणेहिं विभज्जेज्ज ॥ २४ ॥

संख्यां स्थापय प्रथम पादाङ्केनापि गुणय तामध ।
तस्याप्यर्धं गृहीत्वा त्रिभि . स्थानैर्विभज्यताम् ॥ २४ ॥

सर्वस्यैव च्छन्दसो या वृत्ताना सख्या यथा त्र्यक्षरस्याष्टौ तां प्रथम स्थापय । पश्चात्पादाङ्केनाधस्तामेव गुणय । पादाङ्क पादपरिमाणम् । इह पादाङ्कस्त्रिकम् । तेनाष्टाना गुणनाच्चतुर्विंशतिर्भवति । ततोऽष्टौ चतुर्विंशतिश्चेति स्थानद्वय सपद्यते । अनन्तर तस्यापि चतुर्विंशतेरर्धो द्वादश गृहीत्वा त्रिभिः स्थानैर्विभज्यताम् ॥ २४ ॥

एए पंच पएसा मज्झिमअं तिउणअं करेज्ज [इ]ह ।
संखा वण्णा मत्ता लहुगुरुआ होन्ति पाआले ॥ २५ ॥

---

१ नरेन्द्रगचितां AB २ प्रथमनवप्रहार AB ३ पढमवारात्थो AB ४ प्रथमरवदेधच्चमरपुरतो AB ५ प्रथमरवस्याध चामर ? ६ तस्त्तवि Com ७ गणेहिं AB ८ तृप्ति A, तृमि B ९ पभेआ Com

[एते पञ्च प्रदेशा[1] मध्यमं त्रिगुणं कुरुतेह ।
संख्या वर्णा मात्रा लघवो गुरवो भवन्ति पाताले ॥ २५ ॥]

एवमनेन प्रकारेण पञ्च प्रभेदा भवन्ति । तद्यथा अष्टौ चतुर्विंशतिर्द्वादश[द्वादश द्वादश] चेति । तेषा च यन्मध्यमं[2] स्थानं तत् त्रिगुण कुरु । द्वादश त्रिभिर्गुणयित्वा षट्त्रिंशद्भवन्ति । एवं कृते संख्यादीना पञ्चानां लाभो भवति ॥ उदाहरणम् ८, २४, ३६, १२, १२ । एवमस्मात् प्रभेदा अष्टौ त्र्यक्षरस्य, सर्वप्रभेदेषु च वर्णाश्चतुर्विंशतिर्मात्राः षट्त्रिंशत्, लघवो द्वादश, गुरवश्च द्वादश एवेति पातालाल्लभ्यते ॥ २५ ॥

शाल्मलिमाह—**ठविऊण** इति ।

ठविऊण तिण्णि तीस अ सत्तावीस अ कमेण एएण ।
वड्ढंति दोण्णि एक्क व लहसइ अ एक्कं कमेणेअ ॥ २६ ॥
दोवड्ढि [इक्कहाणी] एक्केक्कं वड्ढए[3] तहा मज्झे[3] ।
तावं [समप्पइ एअं दोच्चिअ णिहणे ठिआ जाव ।
इअ संवलिपत्थारो] मत्तावित्ताण काअव्वो[4] ॥ २७ ॥
छव्वीसं गाहाणं पत्थारो संवली मए भणिओ ।

स्थापयित्वा त्रीणि त्रिंशच्च सप्तविंशतिं च क्रमेणानेन ।
वर्धेते[5] द्वावेको ह्रसते चैकः क्रमेणैव[6] ॥ २६ ॥
द्विवृद्धिरेकहानिरेकैको दीयते तथान्तः ।
तावत्समर्प्यत एतद् द्वावेव निधने स्थितौ यावत् ॥
इति शाल्मलिप्रस्तारो मात्रावृत्तानां कर्तव्य. ॥ २७ ॥
षड्विंशतेर्गाथानां प्रस्तारः शाल्मलिर्मया भणित. ।

इत्यनेन प्रकारेण मया गाथाना षड्विंशतेर्लक्ष्म्याद्याना शाल्मल्याख्यः प्रस्तारो भणितः । त्रीणि त्रिंशत् सप्तविंशतिश्चेति[7] स्थानत्रये क्रमेणानेन अनया परिपाट्या स्थापिते किं कर्तव्यमित्याह—**वड्ढंति** इति । तेन त्रिषु द्वौ वर्धेते त्रिंशत्येक इति । सप्तविंशतावेक तु ह्रसते[8] लुप्यते । एवमेकस्मिन् स्थाने द्वाभ्या वृद्धिर्भवति तथा तृतीयेऽप्येकेन हानिर्भवति । अन्तेश्च[9] मध्यस्थाने एकैकं वर्धते । अन्तःशब्दो मध्यपर्यायः । एव क्रियद्यावत् क्रियत इत्याह—तावदेव तत् समर्प्यते ह्रास्यते यावन्निधनेऽवसाने द्वावेव द्वौ स्थितौ भवतः ॥ एतदेवोपसहरति—इति शाल्मलिप्रस्तार इति ॥२६॥२७॥

किमर्थमित्याह—**लहुआणं** इति ।

---

१ प्रभेदा　२ यन्यन्यनं B　All words from तेषा च यत् to लाभो भवति (both included) are dropped in A　३ दिजए तहा अतो Com　४ ताव सतावित्ताण काअव्वो होइ पत्थरो AB　५ च वध्यते AB　६ क्रमोनैव B, मानैव A　७ त्रिंशत्स्वेति AB　८ ह्नते　९ अन्त्यश्च AB

अंतं फंरिसं घेत्तुं विउणा विउणेसु [सु]वणु वण्णेसु ।
एक्केक्कं चमरेसुं मुंचह उद्दिट्ठए छउए ॥ ३४ ॥

अन्त स्पर्शं गृहीत्वा द्विगुणाद्द्विगुणेषु सुतनु वर्णेषु ।
एकैक चमरेषु मुञ्चोद्दिष्टे छाते ॥ ३४ ॥

